અથઋષભગોપીપેસ્યયરણીપુન્નધૈય

રકરકારકણીપોવા

॥श्रीगणेशायनमः॥ॐनमःपरमात्मने॥चित्रोहवैगांग्यायनिर्यक्ष्यमा
णआरुणिंवव्रेसहपुत्रंश्वेतकेतुंप्रजिघाययाजयेतितंहासागतंपप्र
च्छगौतमस्यपुत्रोस्तिसंवृतंलोकेयस्मिन्माधास्यस्यन्यतमोवाध्वातस्य
मालोकेधास्यसीतिसहोवाचनाहमेतद्वेदहंताचार्यंपृच्छानीतिसहपि
तरमासाद्यपप्रच्छेतीतिमाप्राक्षीत्कथंप्रतिब्रवाणीतिसहोवाचाहमप्येतं
नवेदसदस्येववयंस्वाध्यायमधीत्यहरामहेयन्नःपरेददत्येह्युभौगमि १
ष्यावइतिसहसमित्पाणिश्चित्रंगांग्यायनिंप्रतिचक्रमउपायानीतितं
होवाचब्रह्मार्होसिगौतमयोनमानमुपागाएहिव्येवत्वाज्ञपयिष्यामी

कौ १

न२

ति॥१॥सहोवाचयेवैकेचास्माल्लोकात्प्रयंतिचंद्रमसमेवतेसर्वेगच्छंतिते
षांप्राणैःपूर्वपक्षआप्यायतेतानपरपक्षेप्रजनयत्येतद्वैस्वर्गस्यलो
कस्यद्वारंयश्चंद्रमास्तंयःप्रत्याहतमतिसृजतेथयोनप्रत्याहतमिहवृ
ह ष्टिर्भूत्वावर्षतिसइहकीटोवापतंगोवामत्स्योवाशकुनिर्वासिंहोवावरा
होवापरश्वान्वाशार्दूलोवापुरुषोवान्योवातेषुतेषुस्थानेषुप्रत्याजायते
यथाकर्मयथाविद्यंतमागतंपृच्छतिकोसीतितंप्रतिब्रूयाद्विचक्षणादृत
वोरेतआभृतंपंचदशात्प्रसूतात्पित्र्यावतस्तंमापुंसिकर्तर्येरयध्वंपुंसाक
र्त्रामातरिमानिषिंचसजायमानोद्वादशत्रयोदशोमासोद्वादशत्रयोदशे

न पित्रासंतद्विदेप्रतितद्विदेह तन्मऋतवोमर्त्यवआरभध्वंतेनसत्येन तेन तप
सऋतुरस्म्यार्तवोस्मिकोसित्वमस्मीतितमतिसृजते॥२॥ सएतंदेवयानं
पंथानमापद्याग्निलोकमागछतिसवायुलोकंसवरुणलोकंसइंद्रलोकंसप्र
जापतिलोकंसब्रह्मलोकं तस्यहवाएतस्यब्रह्मलोकस्यारोह्रदोमुहूर्तायेष्टि
हाविजरानदील्योवृक्षःसालज्जंसंस्थानमपराजितमायतनमिंद्रप्रजापती
द्वारगोपौविभुप्रमितंविचक्षणासंद्यमितौजाःपर्यंकःप्रियाचमानसीप्र २
तिरूपाचचाक्षुषीपुष्पाण्यादायावयतौवैजगान्यंबाश्चांबायवीश्चाप्सर
सोंबयानद्यस्तमित्थंविदागछतितंब्रह्माहाभिधावतममयशसाविजरांवा

पाठः सालज्यं

गा २

अयन्नदींप्रापन्नवाअयंजरयिष्यतीति॥३॥तंपंचशतान्यप्सरसांप्रतियंति पं च १
शतंफलहस्ताःशतमांजनहस्ताःशतंमाल्यहस्ताःशतंवासोहस्ताःशतं
चूर्णहस्ताःतंब्रह्मालंकारेणालंकुर्वंतिसब्रह्मालंकारेणालंकृतोब्रह्म
विद्वान्ब्रह्माभिप्रैतिसआगछत्यारंह्रदंतंमनसात्येतितमित्वासंप्रतिवि
दोमज्जंतिसआगछतिमुहूर्तान्येष्टिहांस्तेस्मादपद्रवंतिसआगछतिवि
जरांनदींतांमनसैवात्येतितत्सुकृतदुष्कृतेधुनुवातेतस्यप्रियाज्ञातयः
सुकृतमुपयंत्यप्रियादुष्कृतंतद्यथारथेनधावयन्रथचक्रेपर्यवेक्षेतैवम
होरात्रेपर्यवेक्षेतैवंसुकृतदुष्कृतेसर्वाणिचद्वंद्वानिसएषविसुकृतोविदुष्कृ

नज्यं २

ग ३

तोब्रह्मविद्वान्ब्रह्मैवाभिप्रैति॥४॥सआगच्छतील्यंवृक्षंतंब्रह्मगंधःप्रविशति
सआगच्छतिसालज्यंसंस्थानंतंब्रह्मरसःप्रविशतिसआगच्छत्यपराजित
मायतनंतंब्रह्मयशःप्रविशतिसआगच्छतीन्द्रप्रजापतीद्वारगोपौतावस्माद
पद्रवतःसआगच्छतिविभुप्रमितंतंब्रह्मतेजःप्रविशतिसआगच्छतिविच
क्षणामासंदींबृहद्रथंतरेसामनीपूर्वौपादौश्यैतनौधसेचापरौवैरूपवै
राजेअनूच्येशाक्वररैवतेतिरश्चीसाप्रज्ञाप्रज्ञयाहिविपश्यतिसआगच्छ
त्यमितौजसंपर्यंकंसप्राणस्तस्यभूतंचभविष्यच्चपूर्वौपादौश्रीश्चेराचा
परौभद्रयज्ञायज्ञियेशीर्षण्येबृहद्रथंतरेअनूच्येऋचश्चसामानिचप्राची

नातानानियजूंषितिरश्चीनानि — — — — — — सोमांशवउपस्तरणमुद्गी
थोपश्रीःश्रीरुपबर्हणंतस्मिन्ब्रह्मास्तेतमित्थंवित्पादेनैवाग्रआरोहति
तंब्रह्मापृच्छतिकोसीतितंप्रतिब्रूयात्॥५॥ऋतुरस्म्यार्तवोस्म्याकाशाद्यो
भाये पा० नेःसंभूतोभार्यायैरेतःसंवत्सरस्यतेजोभूतस्यभूतस्यात्माभूतस्यभूतस्य
त्वमात्मासियस्त्वमसिसोहमस्मीतितमाहकोहमस्मीतिसत्यमितिब्रूयात्किं
तद्यत्सत्यमितियदन्यद्देवेभ्यश्चप्राणेभ्यश्चतत्सदथयद्देवाश्चप्राणाश्च
तत्त्यंतदेतयावाचाभिव्याह्रियतेसत्यमित्येतावदिदंसर्वमिदंसर्वमस्मीत्ये सी २
वैनंतदाहतदेतच्छ्लोकेनाभ्युक्तम्॥६॥यजूदरःसामशिराअसावृङ्मूर्तिर

दृक १

व्ययःसब्रह्मेतिविज्ञेयःसऋषिर्ब्रह्ममयोमहानितितमाहकेनमेपौंस्नानि
नामान्याप्नोषीतिप्राणेनेतिब्रूयात्केननपुंसकानीतिमनसेतिकेनस्त्री
नामानीतिवाचेतिकेनगंधानितिघ्राणेनेतिकेनरूपाणीतिचक्षुषे
तिकेनशब्दानितिश्रोत्रेणेतिकेनान्नरसानितिजिह्वयेतिकेनकर्माणी
तिहस्ताभ्यामितिकेनसुखदुःखेइतिशरीरेणेतिकेनानंदंरतिंप्रजा
तिमित्युपस्थेनेतिकेनेत्याइतिपादाभ्यामितिकेनधियोविज्ञातव्यंका ४
मानितिप्रज्ञयैवेतिब्रूयात्तमाहँयैवैखलुमेलोकोयंतेसावितिसाया
ब्रह्मणोजितिर्याव्यष्टिस्तांजितिंजयतितांव्यष्टिंव्यश्नुतेयएवंवेदयए

हापोर

वंवेद॥१॥आरण्यकेप्रथमोध्यायः॥१॥ ॐ प्राणोब्रह्मेतिहस्माहकौषीत
ह२ किस्तस्यवाएतस्यप्राणस्यब्रह्मणोमनोदूतंचक्षुर्गोप्तृश्रोत्रंसंश्राव
यितृवाक्परिवेष्ट्रीसयोहवाएतस्यप्राणस्यब्रह्मणोमनोदूतंवेददूत
वान्भवतियश्चक्षुर्गोप्तृगोप्तृमान्भवतियःश्रोत्रंसंश्रावयितृसंश्राव
यितृमान्भवतियोवाचंपरिवेष्ट्रींपरिवेष्ट्रीमान्भवतितस्मैवाएतस्मै
प्राणायब्रह्मणएएतादेवताअयाचमानायबलिंहरंत्येवंहैवास्मैसर्वा
णिभूतान्ययाचमानायैवबलिंहरंतियएवंवेदतस्योपनिषंनया
चेदितितद्यथाग्रामंभिक्षित्वालब्ध्वोपविशेन्नाहमतोदत्तमश्नीयामिति

त्या

तएवैनमुपमंत्रयंतेयेपुरस्तात्प्रचक्षीरन्नेषधर्मोयाचितोभवत्यन्नदास्त्वे
वैनमुपमंत्रयंतेददामतइति॥१॥प्राणोब्रह्मेतिहस्माहपैंग्यस्तस्यहवाए
तस्यप्राणस्यब्रह्मणोवाक्परस्ताच्चक्षुरारुंधतेचक्षुःपरस्ताच्छ्रोत्रमारुं
धतेश्रोत्रंपरस्तान्मनआरुंधतेमनःपरस्तात्प्राणआरुंधतेतस्मैवाएतस्मै
प्राणायब्रह्मणएएतादेवताअयाचमानायबलिंहरंत्येवंहैवास्मैसर्वाणि
भूतान्ययाचमानायैवबलिंहरंतियएवंवेदतस्योपनिषंनयाचेदिति ५
तद्यथाग्रामंभिक्षित्वालब्ध्वोपविशेन्नाहमतोदत्तमश्नीयामितितएवैन
मुपमंत्रयंतेयेपुरस्तात्प्रत्याचक्षीरन्नेषधर्मोयाचितोभवत्यन्नदास्त्वे

दे१

वैनमुपमंत्रयंतेददामतइति॥२॥अथातएकधनावरोधनंयएकधन
मभिध्यायात्पौर्णमास्यांवामावास्यायांवाशुद्धपक्षेवापुण्येनक्षत्रेएते
षामेकस्मिन्पर्वण्यग्निमुपसमाधायपरिसमुह्यपरिस्तीर्यपर्युक्ष्यदक्षिणं
जान्वाच्यस्रुवेणवाज्याहुतीर्जुहोतिवाङ्नामदेवतावरोधनीसामेमुष्मादि
दमवरुंध्यात्तस्यैस्वाहाप्राणोनामदेवतावरोधनीसामेमुष्मादिदमव
रुंध्यात्तस्यैस्वाहाचक्षुर्नामदेवतावरोधनीसामेमुष्मादिदमवरुंध्यात्तस्यै
स्वाहाश्रोत्रंनामदेवतावरोधनीसामेमुष्मादिदमवरुंध्यात्तस्यैस्वाहामनो
नामदेवतावरोधनीसामेमुष्मादिदमवरुंध्यात्तस्यैस्वाहाप्रज्ञानामदे

वतावरोधनीसामेमुष्मादिदमवरुंध्यात्तस्मैस्वाहेत्यथयद्धूमगंधंप्रजिघ्रा
याज्ज्यलेपेनांगान्यनुविमृज्यवाचंयमोऽभिप्रव्रज्यस्पार्श्यंब्रूयाद्दूतंवाप्रहिणु
याल्लभतेहैव।।३।।अथातोदैवस्मरोयस्यप्रियोबुभूषेद्यस्यैवायेषांवाया
सांवैतेषामेवैकस्मिन्पर्वण्येतयैवावृतैताआज्याहुतीर्जुहोतिवाचंतेम
यिजुहोम्यसौस्वाहाप्राणंतेमयिजुहोम्यसौस्वाहाचक्षुस्तेमयिजुहो ६
म्यसौस्वाहाश्रोत्रंतेमयिजुहोम्यसौस्वाहामनस्तेमयिजुहोम्यसौस्वाहाप्र
ज्ञांतेमयिजुहोम्यसौस्वाहेत्यथयद्धूमगंधंप्रजिघ्रायाज्ज्यलेपेनांगान्य
नुविमृज्यवाचंयमोऽभिप्रव्रज्यसंस्पर्शंजिगमिषेदपिवाताद्वातिष्ठेत्सं

भाषमामाणंप्रियोहैवभवतिस्मरंतेहैवास्य।।४।।अथातःसंयमनंप्रात
र्दनमांतरमग्निहोत्रमित्याचक्षतेयावद्वैपुरुषोभाषतेनतावत्प्राणितुं
शक्नोतिप्राणंतदावाचिजुहोतियावद्वैपुरुषःप्राणितिनतावद्भाषितुं
शक्नोतिवाचंतदाप्राणेजुहोत्येतेअनंतेअमृतेआहुतीजाग्रच्चस्वपं
श्चसंततंजुहोत्यथयाअन्याआहुतयोऽंतवत्यस्ताःकर्ममय्योहिभवं
तितद्धस्मैतत्पूर्वेविद्वांसोऽग्निहोत्रंनजुहवांचक्रुः।।५।।उक्थंब्रह्मेतिहस्मा
हशुष्कभृंगारस्तदृगित्युपासीतसर्वाणिहास्मैभूतानिश्रैष्ठ्यायाभ्यर्च्यं
तेतद्यजुरित्युपासीतसर्वाणिहास्मैभूतानिश्रैष्ठ्याययुज्यंतेतत्सामेत्यु

पासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय सन्नमंते तच्छ्रीरित्युपासीत तद्यश
इत्युपासीत तत्तेज इत्युपासीत तद्यथैतच्छ्रीमत्तमं यशस्वितमं तेजस्वित
[illegible] ममिति शास्त्रेषु भवत्येवं हैव स सर्वेषु भूतेषु श्रीमत्तमो यशस्वि
तमस्तेजस्वितमो भवति य एवं वेद तदैष्टिकं कर्ममयमात्मानमध्वर्युः संस्क
रोति तस्मिन्यजुर्मयं प्रवयति यजुर्मय ऋङ्मयं होत ऋ [illegible] ङ्मये साममय
मुद्गाता स एष त्रयी विद्यायात्मा तैष उ एवै तदिङ्गस्यात्मा भवति य एवं वे
द॥६॥ अथातः सर्वजितः कौषीतकेस्त्रीण्युपासनानि भवंति सर्वजि
द्धस्म कौषीतकिरुद्यंतमादित्यमुपतिष्ठते यज्ञोपवीतं कृत्वोदकमानीय त्रिः

दे त ४

७

प्रसिच्योदपात्रं वर्गोसि पाप्मानं मे वृङ्ग्धीत्यैतयैवावृता मध्ये संतमुद्वर्गो
सि पाप्मानं म उद्वृङ्ग्धीत्यैतयैवावृतास्तं यंतं संवर्गोसि पाप्मानं मे संवृङ्ग्धीति
तद्यदहोरात्राभ्यां पापमकरोत्संतद्वृंक्ते तथो एवैवं विद्वानेतयैवावृतादित्य
मुपतिष्ठते यदहोरात्राभ्यां पापं करोति संतद्वृंक्ते॥७॥ अथ मासि मास्यमा
वास्यायां वृत्तायां पश्चाच्चंद्रमसं दृश्यमानमुपतिष्ठेतैतयैवावृता हरित
तृणे वाप्रत्यस्यत्यन्मे सुसमिद्धं हृदयं दिवि चंद्रमसि श्रितं मन्येहं मां तद्विद्वांसं
माहं पुत्र्यमघं रुदमिति न हास्मात्पूर्वाः प्रजाः प्रैतीति नु जातपुत्रस्याथाजा
तपुत्रस्याप्यायस्व समेतु ते संते पयांसि समु यंतु वाजा यमादित्या अंशुमा

प्याययंतीत्यैतास्तिस्रऋचोजपित्वामास्माकंप्राणेनप्रजयापशुभिराप्या
ययिष्ठायोस्मांद्वेष्टियंचवयंद्विष्मस्तस्यप्राणेनप्रजयापशुभिराप्यायस्वेत्यै
वीमावृतमावर्त्तआदित्यस्यावृतमन्वावर्त्तइतिदक्षिणंबाहुमन्वावर्त्तते॥१८॥
अथपौर्णमास्यांपुरस्ताच्चंद्रमसंदृश्यमानमुपतिष्ठतेतयैवावृतासोमो
राजा विचक्षणःपंचमुखोसिप्रजापतिर्ब्राह्मणस्तएकंमुखंतेनमुखे
नराज्ञोसितेनमुखेनमामंनादंकुरुराजातएकंमुखंतेनमुखेनविशोत्सिते ९
नमुखेनमामंनादंकुरुश्येनस्तएकंमुखंतेनमुखेनपक्षिणोत्सितेनमुखेनमामं
नादंकुर्वग्निष्टएकंमुखंतेनमुखेनेमंलोकमत्सितेनमुखेनमामंनादंकुरु

त्वयिपंचमंमुखंतेनमुखेनसर्वाणिभूतान्यत्सितेनमुखेनमामंनादंकु
रुमास्माकंप्राणेनप्रजयायपशुभिरवक्षेष्ठायोस्मांद्वेष्टियंचवयंद्विष्मस्त
स्यप्राणेनप्रजयापशुभिरवक्षीयस्वेतिदैवीमावृतमावर्त्तआदित्यस्याव
तमन्वावर्त्तइतिदक्षिणंबाहुमन्वावर्त्तते॥१९॥अथसंवेशंजायायैहृ
२।५ दयमभिमृशतियत्तेसुसीमेहृदयंश्रितमंतःप्रजापतौतेनामृतत्वस्येशा
नेमात्वंपुत्र्यमघंनिगाइतिनहास्याःपूर्वप्रजाप्रैतीति॥२०॥अथप्रोष्या
यन्पुत्रस्यमूर्द्धानमभिजिघ्रेत्॥अंगादंगात्संभवसिहृदयादधिजाय
से॥आत्मावैपुत्रनामासिसंजीवशरदःशतमितिनामास्यदधाति

श्मा भव परशुर्भव हिरण्यमस्तृतं भव वेदो वै पुत्र नामासि स जीव शरदः शतमिति
नामास्य गृह्णात्यथैनं परिगृह्णाति येन प्रजापतिः प्रजाः पर्यगृह्णात्तदरिष्ट्यै
तेन त्वा परिगृह्णाम्यसावित्यथास्य दक्षिणे कर्णे जपत्यस्मे प्रयंधि मघव
न्नृजीषिन्नितीन्द्र श्रेष्ठानि द्रविणानि धेहीति सव्ये मा छेत्था मा व्यथिष्ठाः श
प॰॥जी तं शरद आयुषो जीव स्व पुत्र ते नाम्ना मूर्द्धानमभिजिघ्रामीति त्रिरस्य मूर्द्धा
नमभिजिघ्रेद्गवां त्वा हिंकारेणाभिहिंकरोमीति त्रिरस्य मूर्द्धानमभिहिं ९
कुर्यात् ॥११॥ अथातो दैवः परिमर एतद्वै ब्रह्म दीप्यते यदग्निर्ज्वलत्यथैतन्
म्रियते यन्न ज्वलति तस्यादित्यमेव तेजो गच्छति वायुं प्राण एतद्वै ब्रह्म

दीप्यते यदादित्यो दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य चन्द्रमसमेव तेजो
गच्छति वायुं प्राण एतद्वै ब्रह्म दीप्यते यच्चन्द्रमा दृश्यतेऽथैतन्म्रियते यन्न दृ
श्यते तस्य विद्युतमेव तेजो गच्छति वायुं प्राण एतद्वै ब्रह्म दीप्यते यद्विद्युद्वि
द्योततेऽथैतन्म्रियते यन्न विद्योतते तस्या दिश एव तेजो गच्छति वायुं प्राणस्ता
वा एताः सर्वा देवता वायुमेव प्रविश्य वायौ मृता न मृच्छन्ते तस्मादेव पुनरुदीर
त इत्यधिदैवतमथाध्यात्मं ॥१२॥ एतद्वै ब्रह्म दीप्यते यद्वाचा वदत्यथैतन्म्रिय
ते यन्न वदति तस्य चक्षुरेव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यच्च
क्षुषा पश्यत्यथैतन्म्रियते यन्न पश्यति तस्य श्रोत्रमेव तेजो गच्छति प्राणं प्राण

एतद्वै ब्रह्म दीप्यते यच्छ्रोत्रेण शृणोत्यथै तन्म्रियते यन्न शृणोति तस्य मन प १
एव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यन्मनसा ध्यायत्यथैत
न्म्रियते यन्न ध्यायति तस्य प्राणमेव तेजो गच्छति प्राणं प्राणस्ता वा ए
ताः सर्वा देवताः प्राणमेव प्रविश्य प्राणे मृत्वा न मूर्छंते तस्मादेव पुनरु
वै २ दीरते तद्यदिह वा एवं विद्वांस उभौ पर्वतावभिप्रवर्तेयातां दक्षिणश्चोत्त
रश्च तुस्तूर्षमाणो न हैवैनं स्तृण्वीयातामथ य एनं द्विषंति यांश्च स्वयं द्वे १०
ष्टि त एवैनं परिम्रियंते ॥१३॥ अथातो निःश्रेयसादानमेता ह वै देवता अ
हं श्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रमुस्तद्वाक्यपातश्शुष्कं दारुभू

तं शिश्येऽथैनद्वाक् प्रविवेश तद्वा चा वदच्छिश्य एवाथैनच्चक्षुः प्रविवेश
छि रय २ तद्वाचा वदच्चक्षुषा पश्यँ एवाथैनच्छ्रोत्रं प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छ्रो
त्रेण शृण्वच्छिश्य एवाथैतन्मनः प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छ्रोत्रेण
शृण्वदेव मनसा ध्यायच्छिश्य एवाथैन प्राणः प्रविवेश तत्तत एव समुत्तस्थौ
ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभि
संभूय सहैवैतैः सर्वैरस्माच्छरीरादुच्चक्रमुस्ते वायुप्रविष्टा आकाशात्मानः
स्वरीयुः स्तथो एवैवं विद्वान् प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मान
मभिसंभूय सहैवैतैः सर्वैरस्माच्छरीरादुत्क्रामति स वायुप्रविष्ट आकाशात्मा

स्वरेतिसतज्जछतियत्रैतेदेवास्तत्राप्ययदमृतादेवास्तदमृतोभवतियएवं
वेद॥१४॥अथातःपितापुत्रीयंसंप्रदानमित्तिचाचक्षतेपितापुत्रंप्रेष्यंना
ह्वयतिनवैस्तृणैरगारंसंस्तीर्याग्निमुपसमाधायोदकुंभंसपात्रमुपनिधा
२पे४ याहतेनवाससासंप्रछन्नःपितैतएत्यपुत्रउपरिष्टादभिनिपद्यतइंद्रियै नि॰४
रिंद्रियाणिसंस्पृश्यापिवास्माआसीनायाभिमुखायैवसंप्रदध्यादथास्मैसं
प्रयछतिवाचंमेत्वयिदधानीतिपितावाचंतेमयिदधइतिपुत्रःप्राणंमे ११
त्वयिदधानीतिपिताप्राणंतेमयिदधइतिपुत्रश्चक्षुर्मेत्वयिदधानीतिपि
ताचक्षुस्तेमयिदधइतिपुत्रःश्रोत्रंमेत्वयिदधानीतिपिताश्रोत्रंतेमयि

दधइतिपुत्रोऽन्नरसान्मेत्वयिदधानीतिपितान्नरसांस्तेमयिदधइतिपुत्रः
कर्माणिमेत्वयिदधानीतिपिताकर्माणितेमयिदधइतिपुत्रःसुखदुःखेमे
त्वयिदधानीतिपितासुखदुःखेतेमयिदधइतिपुत्रःआनंदंरतिंप्रजा
तिंमेत्वयिदधानीतिपितानंदंरतिंप्रजातिंतेमयिदधइतिपुत्रइत्यांमेत्वयि
दधानीतिपितेत्यांतेमयिदधइतिपुत्रोमनोमेत्वयिदधानीतिपितामनस्ते
मयिदधइतिपुत्रःप्रज्ञांमेत्वयिदधानीतिपिताप्रज्ञांतेमयिदधइतिपुत्रो
यद्युवाउपाभिगदःस्यात्समासेनैवब्रूयात्प्राणान्मेत्वयिदधानीतिपिताप्रा
णांस्तेमयिदधइतिपुत्रोऽपदक्षिणावृदुपनिष्क्रामतितंपितानुमंत्रयतेय

व२

णोब्रह्मवर्च्चसंकीर्त्तिस्त्वाज्जुषतामित्यथेतरःसव्यमन्वंसमन्ववेक्षतेपाणिनां
तर्द्धायवसनांतेनवाप्रछाद्यस्वर्गांल्लोकान्कामानाप्नुहीतिसयद्यगदःस्या
त्पुत्रस्यैश्वर्येपितावसेत्परिवाव्रजेद्यद्युवैप्रेयात्तथैवैनंसमापयेयुर्यथास
मापयितव्योभवतियथासमापयितव्योभवति॥१५॥ ॥आरण्यकेद्विती
योध्यायः॥२॥ ॥ॐप्रतर्द्दनोहवैदैवोदासिरिंद्रस्यप्रियंधामोपजगामयु
द्धेनचपौरुषेणचतंहेंद्रउवाचप्रतर्द्दनवरंवृणीष्वेतिसहोवाचप्रतर्द्दनस्त्व १२
ति १ मेववृणीष्वयंत्वंमनुष्यायहिततमंमन्यसइतितंहेंद्रउवाचनवैवरोवरस्मै रु:५२
वृणीते त्वमेववृणीष्वेत्यवरोवैकिलमेतिहोवाचप्रतर्द्दनोथोखल्विंद्रःसत्या

देवनेयायसत्यंहींद्रस्तंहेंद्रउवाचमामेवविजानीह्येतदेवाहंमनुष्यायहि
ततमंमन्येयोमांविजानीयात्त्रिशीर्षाणंत्वाष्ट्रमहनमरुन्मुखान्यतीन्साला
वृकेभ्यःप्रायछंबह्वीःसंधाअतिक्रम्यदिविप्रल्हादीयानतृणमहमंतरिक्षे
पौलोमान्पृथिव्यांकालकंजांस्तस्यमेतत्रनलोमच नामीयतेसयोमांवेद
नहवैतस्यकेनचनकर्मणालोकोमीयतेनस्तेयेननभ्रूणहत्ययानमातृ
वधेननपितृवधेननास्यपापंचनचकृषोमुखान्नीलंवेतीति॥१॥सहोवाच
प्राणोस्मिप्रज्ञात्मातंमामायुरमृतमित्युपास्स्वायुःप्राणःप्राणोवाआयुर्या
ब्र १ वदस्मिंछरीरेप्राणोवसतितावदायुःप्राणेनह्येवास्मिंल्लोकेऽमृतत्वमाप्नो

तिप्रज्ञयासत्यंसंकल्पंसयोमामायुरमृतमित्युपास्तेसर्वमायुरस्मिंल्लोक
एत्याप्नोत्यमृतत्वमक्षितिंस्वर्गेलोकेतद्धैकआहुरेकभूयंवैप्राणागछंतीति
नहिकश्चनशक्नुयात्सकृद्वाचानामप्रज्ञापयितुंचक्षुषारूपंश्रोत्रेणश
ब्दंमनसाध्यातुमेकभूयंवैप्राणाभूत्वैकैकमेतानिसर्वाणिप्रज्ञापयंतीति
वाचंवदंतीसर्वेप्राणाअनुवदंतिचक्षुःपश्यत्सर्वेप्राणाअनुपश्यंतिश्रोत्रंशृ
ण्वत्सर्वेप्राणाअनुशृण्वंतिमनोध्यायत्सर्वेप्राणाअनुध्यायंतिप्राणंप्राणं १२
तंसर्वेप्राणाअनुप्राणंतीत्येवमुहैतदितिहेंद्रउवाचास्तित्वेवप्राणानांनिःश्रे
यसमिति॥२॥जीवतिवागपेतोमूकान्हिपश्यामोजीवतिचक्षुरपेतोऽधा

न्हिपश्यामोजीवतिश्रोत्रापेतोबधिरान्हिपश्यामोजीवतिमनोपेतोबाला
न्हिपश्यामोजीवतिबाहुछिन्नोजीवत्यूरुछिन्नइत्येवंहिपश्यामइत्यथख
लुप्राणएवप्रज्ञात्मेदंशरीरंपरिगृह्योत्थापयतितस्मादेतदेवोक्थमुपासी
तेतिसैषाप्राणेसर्वाप्तिर्योवैप्राणःसाप्रज्ञायावाप्रज्ञासप्राणस्तस्यैषैव
सुप्तः वदृष्टिरेतद्विज्ञानंयत्रैतत्पुरुषःस्वप्नंनकंचनपश्यत्यथास्मिन्प्राणएवै
कधाभवतितदेनंवाक्सर्वैर्नामभिःसहाप्येतिचक्षुःसर्वैरूपैःसहाप्येतिश्रो
त्रंसर्वैःशब्दैःसहाप्येतिमनःसर्वैर्ध्यानैःसहाप्येतिसयदाप्रतिबुध्यते
स्फु॰१ यथाग्नेर्ज्वलतःसर्वादिशोविष्फुलिंगाविप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः

प्राणायथायतनंविप्रतिष्ठंतेप्राणेभ्योदेवादिवेभ्योल्लोकाः सएषप्राणएवप्र
ज्ञात्मेदंशरीरंपरिगृह्योत्थापयतितस्मादेतदेवोक्थमुपासीतेतिसैषाप्राणेस
र्वाप्तिर्योवैप्राणःसाप्रज्ञायावाप्रज्ञासप्राणस्तस्यैषैवसिद्धिरेतद्विज्ञानंयत्रै
तत्पुरुषआर्त्तोमरिष्यन्नाबल्यमेत्यसंमोहमेतितमाहुरुदक्रमीच्चित्तंनशृ दा४
णोतिनपश्यतिनवाचावदतिनध्यायत्यथास्मिन्प्राणएवैकधाभवतित
देनंवाक्सर्वैर्नामभिःसहाप्येतिचक्षुःसर्वैरूपैःसहाप्येतिश्रोत्रंसर्वैःशब्दैःस १४
हाप्येतिमनःसर्वैर्ध्यानैःसहाप्येतिसयदास्माच्छरीरादुत्क्रामतिसहैवैतैःस
र्वैरुत्क्रामति॥३॥वागेवास्मिन्सर्वाणिनामान्यभिविसृज्यंतेवाचासर्वाणि

नामान्याप्नोतिप्राणएवास्मिन्सर्वेगंधाअभिविसृज्यंतेप्राणेनसर्वान्गंधाना
प्नोतिचक्षुरेवास्मिन्सर्वाणिरूपाण्यभिविसृज्यंतेचक्षुषासर्वाणिरूपाण्याप्नो
तिश्रोत्रमेवास्मिन्सर्वेशब्दाअभिविसृज्यंतेश्रोत्रेणसर्वांछब्दानाप्नोतिमन
एवास्मिन्सर्वाणिध्यानान्यभिविसृज्यंतेमनसासर्वाणिध्यानान्याप्नोतिसहह्ये
तावस्मिंछरीरेवसतःसहोत्क्रामतोथयथास्यैप्रज्ञायैसर्वाणिभूतान्येकंभवं
तितद्व्याख्यास्यामः॥४॥वागेवास्याएकमंगमुदूढंतस्यैनामपरस्तात्प्र
ए२ तिविहिताभूतमात्राप्राणएवास्याएकमंगमुदूढंतस्यगंधःपरस्तात्प्रति
विहिताभूतमात्राचक्षुरेवास्याएकमंगमुदूढंतस्यरूपंपरस्तात्प्रतिविहि

तान्भूतमात्रा श्रोत्रमेवास्या एकमंगमुदूढं तस्य शब्दः परस्तात्प्रतिविहिता भू
तमात्रा जिह्वैवास्या एकमंगमुदूढं तस्याऽन्नरसः परस्तात्प्रतिविहि ताभू
तमात्रा हस्तावेवास्या एकमंगमुदूढं तयोः कर्म परस्तात्प्रतिविहि ताभूत
मात्रा शरीरमेवास्या एकमंगमुदूढं तस्य सुखदुःखे परस्तात्प्रतिविहिता
भूतमात्रोपस्थ एवास्या एकमंगमुदूढं तस्यानंदो रतिः प्रजातिः परस्तात्प्र
तिविहिता भूतमात्रा पादावेवास्या एकमंगमदूढं तयोरित्याः परस्तात्प्रति १५
विहिता भूतमात्रा मन एवास्या एकमंगमुदूढं तस्य धीः कामाः परस्तात्प्रति
विहिता भूतमात्रा ॥५॥ प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति

प्रज्ञया प्राणं समारुह्य प्राणेन सर्वान्गंधानाप्नोति प्रज्ञया चक्षुः समारु
ह्य चक्षुषा सर्वाणि रूपाण्याप्नोति प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वांछब्दा
नाप्नोति प्रज्ञया जिह्वां समारुह्य जिह्वया सर्वानन्नरसानाप्नोति प्रज्ञया ह
स्तौ समारुह्य हस्ताभ्यां सर्वाणि कर्माण्याप्नोति प्रज्ञया शरीरं समारुह्य श
रीरेण सुखदुःखे आप्नोति प्रज्ञयोपस्थं समारुह्योपस्थेनानंदं रतिं प्रजाति
माप्नोति प्रज्ञया पादौ समारुह्य पादाभ्यां सर्वा इत्या आप्नोति प्रज्ञया मनः स
मारुह्य मनसा सर्वाणि ध्यानान्याप्नोति ॥६॥ न हि प्रज्ञयापेता वाङ्नाम किंचन
प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतं नाम प्राज्ञासि षमिति न हि प्र

सं

ज्ञापेतः प्राणो गंधं कंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतं गंधं प्रा
ज्ञासिषमिति न हि प्रज्ञापेतं चक्षू रूपं किंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह
नाहमेतद्रूपं प्राज्ञासिषमिति न हि प्रज्ञापेतं श्रोत्रं शब्दं कंचन प्रज्ञापयेदन्य
त्र मे मनोऽभूदित्याह नाहमेतं शब्दं प्राज्ञासिषमिति न हि प्रज्ञापेता जिह्वाऽन्न
रसं कंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतमन्नरसं प्राज्ञासि
षमिति न हि प्रज्ञापेतौ हस्तौ कर्म किंचन प्रज्ञापयेयातामन्यत्र नौ मनो
हंनाहमें २ ऽभूदित्याहतुर्नावामेतत्कर्म प्राज्ञासिष्वेति न हि प्रज्ञापेतं शरीरं सुखं न
दुःखं किंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतत्सुखं न दुःखं प्रा

१६
३ मे ३
षमि २

षमि ४

ज्ञासिषमिति न हि प्रज्ञापेत उपस्थ आनंदं न रतिं न प्रजातिं कांचन प्रज्ञापये
दन्यत्र मे मनोऽभूदित्याह नाहमेतमानंदं न रतिं न प्रजातिं प्राज्ञासिषमिति न
हि प्रज्ञापेतौ पादावित्यां कांचन प्रज्ञापयेयातामन्यत्र नौ मनोऽभूदित्याह मे ३
हंनाहमें ४ कः तुर्नावामेतामित्यां प्राज्ञासिष्वेति न हि प्रज्ञापेता धीः काचन सिद्ध्येन्न प्रज्ञा
तव्यं प्रज्ञायेत ॥ ७ ॥ न वाचं विजिज्ञासीत वक्तारं विद्यान्न गंधं विजिज्ञासीत
घ्रातारं विद्यान्न रूपं विजिज्ञासीत द्रष्टारं विद्यान्न शब्दं विजिज्ञासीत श्रोतारं
विद्यान्नान्नरसं विजिज्ञासीतान्नरसस्य विज्ञातारं विद्यान्न कर्म विजिज्ञासीत
कर्तारं विद्यान्न सुखदुःखे विजिज्ञासीत सुखदुःखयोर्विज्ञातारं विद्यान्नानं

दंनरतिंनप्रजातिंविजिज्ञासीतानंदस्यरतेःप्रजातेर्विज्ञातारंविद्यान्नेत्यांविजि
ज्ञासीतैतारंविद्यान्नमनोविजिज्ञासीतमंतारंविद्यात्तावाएतादशैवभूतमात्रा
अधिप्रज्ञंदशप्रज्ञामात्राअधिभूतंयद्धिभूतमात्रानस्युर्नप्रज्ञामात्राःस्युर्य
द्वाप्रज्ञामात्रानस्युर्नभूतमात्राःस्युर्नह्यन्यतरतोरूपंकिंचनसिध्येन्नोएत
न्नानातद्यथारथस्यारेषुनेमिरर्पितानाभावराअर्पिताएवमेवैताभूतमात्राः
प्रज्ञामात्राःस्वर्पिताःप्रज्ञामात्राःप्राणेर्पिताःसएषप्राणएवप्रज्ञात्मानंदो
जरोमृतोनसाधुनाकर्मणाभूयान्भवतिनोएवासाधुनाकनीयानेष
ह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतएषउएवासाधुतंयम

धोनिनीषतएषलोकपालएषलोकाधिपतिरेषलोकेशःसमआत्मेतिविद्यात्स
मआत्मेतिविद्यात्॥८॥आरण्यकेतृतीयोध्यायः॥३॥ॐ॥अथहवैगार्ग्योबाला
किरनूचानःसंस्पष्टआससोवसदुशीनरेषुसवसन्मत्स्येषुकुरुपंचालेषुकाशि
विदेहेष्वितिसहाजातशत्रुंकाश्यमाव्रज्योवाचब्रह्मतेब्रवाणीतितंहोवाचाजा
तशत्रुःसहस्रंदद्मइत्येतस्यांवाचिजनकोजनकइतिवाउजनाधावंतीति
॥१॥आदित्येबृहच्चंद्रमस्यन्नंविद्युतिसत्यंस्तनयित्नौशब्दोवायाविंद्रोवैकुंठआ
काशेपूर्णमग्नौविषासहिरित्यप्सुतेजइत्यधिदैवतमथाध्यात्ममादर्शेप्रति
रूपश्छायायांद्वितीयःप्रतिश्रुत्कायामसुरितिशब्देमृत्युःस्वप्नेयमःशरीरे

सम्वादः इति सर्वत्र भाष्यपाठः २

प्रजापतिर्दक्षिणेक्षिणि वाचः सव्येक्षिणि सत्यस्य ॥ १ ॥ स होवाच बालाकिर्य ए
वैष आदित्ये पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिंसं
वादयिष्ठा बृहन्पांडरवासा अतिष्ठाः सर्वेषां भूतानां मूर्द्धेति वा अहमेतमुपा
स इति स यो हैतमेवमुपास्तेतिष्ठाः सर्वेषां भूतानां मूर्द्धा भवति ॥ २ ॥ स होवा
च बालाकिर्य एवैष चंद्रमसि पुरुषस्तमेवाहमुपास इति तं होवाचाजातश
त्रुर्मा मैतस्मिंसंवादयिष्ठा अन्नस्यात्मेति वा अहमेतमुपास इति स यो
हैतमेवमुपास्तेन्नस्यात्मा भवति ॥ ४ ॥ स होवाच बालाकिर्य एवैष विद्यु
ति पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिंसंवादयिष्ठाः

सत्यस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते सत्यस्यात्मा भ
वति ॥ ५ ॥ स होवाच बालाकिर्य एवैष स्तनयित्नौ पुरुषस्तमेवाहमुपास इ
ति तं होवाचाजातशत्रुर्मा मैतस्मिंसंवादयिष्ठाः शब्दस्यात्मेति वा अहमेतमुपा
स इति स यो हैतमेवमुपास्ते शब्दस्यात्मा भवति ॥ ६ ॥ स होवाच बालाकिर्य
एवैष वायौ पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिंसंवा
दयिष्ठा इंद्रो वैकुंठोऽपराजिता सेनेति वा अहमेतमुपास इति स हैयो तमेवमु
पास्ते जिष्णुर्ह वा अपराजयिष्णुरन्यतस्त्यजायी भवति ॥ ७ ॥ स होवाच बालाकि
र्य एवैष आकाशे पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिं

न्संवादयिष्ठाःपूर्णमप्रवर्त्तिब्रह्मेतिवाअहमेतमुपासइतिसयोहैतमेवमु
पास्तेपूर्यतेप्रजयापशुभिर्यशसाब्रह्मवर्च्चसेनस्वर्गेणलोकेनसर्वमायुरेति
॥८॥सहोवाचबालाकिर्यएवैषोग्नौपुरुषस्तमेवाहमुपासइतितंहोवाचा
जातशत्रुर्मामैतस्मिन्संवादयिष्ठाविषासहिरितिवाअहमेतमुपासइ
तिसयोहैतमेवमुपास्तेविषासहिर्हवाअन्येषुभवति॥९॥सहोवाचबाला
किर्यएवैषोऽप्सुपुरुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामैत
स्मिन्संवादयिष्ठास्तेजसआत्मेतिवाअहमेतमुपासइतिसयोहैतमेव
मुपास्तेतेजसआत्माभवतीत्यधिदैवतमथाध्यात्मं॥१०॥सहोवाचबाला

किर्यएवैषआदर्शेपुरुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामै
तस्मिन्संवादयिष्ठाःप्रतिरूपइतिवाअहमेतमुपासइतिसयोहैतमेवमु
पास्तेप्रतिरूपोहैवास्यप्रजायामाजायतेनाप्रतिरूपः॥११॥सहोवाचबाला
किर्यएवैषछायायांपुरुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामै
तस्मिन्संवादयिष्ठाद्वितीयोनपगइतिवाअहमेतमुपासइतिसयोहैतमे
वमुपास्तेविंदतेद्वितीयाद्वितीयवान्हिभवति॥१२॥सहोवाचबालाकिर्य
एवैषप्रतिश्रुत्कायांपुरुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामै
तस्मिन्संवादयिष्ठाअसुरितिवाअहमेतमुपासइतिसयोहैतमेवमुपास्ते

नपुराकालात्संमोहमेति॥१३॥सहोवाचबालाकिर्यएवैषशब्दःपुरुषस्त
मेवाहमुपासइतितंहोवाचाजातशत्रुर्मामैतस्मिन्संवादयिष्ठामृत्युरिति
वाअहमेतमुपासइतिसयोहैतमेवमुपास्तेनपुराकालात्प्रैतीति॥१४॥स
होवाचबालाकिर्येनैतत्पुरुषःसुप्तःस्वप्न्[illegible]याचरतितमेवाहमुपासइ
तितंहोवाचाजातशत्रुर्मामैतस्मिन्संवादयिष्ठायमोराजेतिवाअहमेतमु
पासइतिसयोहैतमेवमुपास्तेसर्वंहास्माइदंश्रैष्ठ्याययम्यते॥१५॥सहो
वाचबालाकिर्यएवैषशरीरेपुरुषस्तमेवाहमुपासइतितंहोवाचाजातश
त्रुर्मामैतस्मिन्संवादयिष्ठाःप्रजापतिरितिवाअहमेतमुपासइतिसयोहै

तमेवमुपास्तेप्रजायतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोके
नसर्वमायुरेति॥१६॥सहोवाचबालाकिर्यएवैषदक्षिणेक्षिणिपुरुषस्तमे
वाहमुपासइतितंहोवाचाजातशत्रुर्मामैतस्मिन्संवादयिष्ठावाचआत्मा
ग्नेरात्माज्योतिषआत्मेतिवाअहमेतमुपासइतिसयोहैतमेवमुपास्त
एतेषांसर्वेषामात्माभवति॥१७॥सहोवाचबालाकिर्यएवैषसव्येक्षिणि
पुरुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामैतस्मिन्संवादयिष्ठाः
सत्यस्यात्माविद्युतआत्मातेजसआत्मेतिवाअहमेतमुपासइतिसयो
हैतमेवमुपास्तएतेषांसर्वेषामात्माभवति॥१८॥ततउहबालाकिस्तूष्णीं

मासंतंहोवाचाजातशत्रुरेतावन्नुबालाका३इत्येतावदितिहोवाचबालाकि
स्तंहोवाचाजातशत्रुर्मृषावैखलुमासंवादयिष्ठाब्रह्मतेब्रवाणीतियोवै
बालाकएतेषांपुरुषाणांकर्त्तायस्यवैतत्कर्मसवैवेदितव्यइतिततउह
बालाकिःसमित्पाणिःप्रतिचक्रमउपायानीतितंहोवाचाजातशत्रुःप्रति
लोमरूपमेतन्मन्येयात्क्षत्रियोब्राह्मणमुपनयेतैहिव्येवत्वाज्ञपयिष्यामी
तितंहैपाणावभिपद्यप्रवव्राजतौहसुप्तंपुरुषमाजग्मतुस्तंहाजातशत्रुरा
मंत्रयांचक्रेबृहत्पांडरवासःसोमराजन्नितिसउहशिश्यएवततउहैनंयष्ट्या
विचिक्षेपसततएवसमुत्तस्थौतंहोवाचाजातशत्रुःक्वैषएतद्बालाकेपुरुषो

कै ५ भा॰ पृ॰

२१

कै भाष्य १

शयिष्टक्वैतदभूत्कुतएतदागादितिततउहबालाकिर्नविजज्ञेतंहोवाचा
जातशत्रुर्यत्रैषएतद्बालाकेपुरुषोऽशयिष्टयत्रैतदभूद्यतएतदागादि
तिहितानामपुरुषस्यनाड्योहृदयात्पुरीततमभिप्रतन्वंतितद्यथासहस्रधा
केशोविपाटितस्तावदण्व्यःपिंगलस्याणिम्नातिष्ठंतिशुक्लस्यकृष्णस्यपी
तस्यलोहितस्यचतासुतदाभवतियदासुप्तःस्वप्नंनकंचनपश्यति॥१९॥अ
थास्मिन्प्राणएवैकधाभवतितदेनंवाक्सर्वैर्नामभिःसहाप्येतिचक्षुःसर्वैः
रूपैःसहाप्येतिश्रोत्रंसर्वैःशब्दैःसहाप्येतिमनःसर्वैर्ध्यातैःसहाप्येतिसयदा
प्रतिबुध्यतेयथाग्नेर्ज्वलतःसर्वादिशोविष्फुलिंगाविप्रतिष्ठेरन्नेवमेवैतस्मा

दात्मनः प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोकाः स एष
प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तद्य
था क्षुरः क्षुरधानेऽवोपहितो विश्वंभरो वा विश्वंभरकुलाय एवमेवैष प्रज्ञा
त्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तमेतमात्मानमेत
आत्मानोऽन्ववस्यंते यथा श्रेष्ठिनं स्वास्तद्यथा श्रेष्ठी स्वैर्भुंक्ते यथा वा स्वाः
श्रेष्ठिनं भुंजंत्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुंक्ते एवमेवैत आत्मान एत
मात्मानं भुंजंति स यावद्ध वा इंद्र एतमात्मानं न विजज्ञे तावदेनमसुरा
अभिबभूवुः स यदा विजज्ञेऽथ हत्वासुरान्विजित्य सर्वेषां च देवानां श्रैष्ठ्यं

२२
कौ॰ २ भा॰

कौषी १ भाष्ये

स्वाराज्यमाधिपत्यं पर्यैत्तथो एवैवं विद्वान्सर्वान्पाप्मनोऽपहत्य सर्वेषां च भूता
नां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद य एवं वेद ॥२०॥ आरण्यके चतु
र्थोऽध्यायः ॥४॥ समाप्तः ॥ ॐ ऋतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्व
क्तारमवत्ववतु मामवतु वक्तारं मयि मेधा मयि महो वाङ्मे मनसि प्रतिष्ठि
ता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मा मा हिं
सीरनेनाधीतेनाहोरात्रान्संवसाम्यग्नद्भ्ला न मद्भ्लानम ऋषिभ्यो मंत्रकृद्भ्यो
मंत्रपतिभ्यो नमोऽस्तु देवेभ्यः शिवा नः शंतमा भव सुमृडीका सरस्वति मा ते व्यो
म संदृश्य दब्धं मन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः ॥१॥ ॐ

नं २

थातः संहिताया उपनिषत्पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति शौर
वीरो मांडूकेय आकाशः संहितेत्यस्य मांडव्यो वेदयांचक्रे सहाविपरिहृतो मेने
नमेस्य पुत्रेण समगादिति परिहृतो मे नइत्यागस्त्यः समानं ह्यत्र पितुश्च पुत्र
स्य च वायुश्चाकाशश्चेत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं मन उत्तररूपं प्राणः
११५ संहितेति शौरवीरो मांडूकेयोथ ह स्मास्य पुत्र आह दीर्घो मनसा वाश्रये कीर्त्त
यति तद्धा वा वदति तस्मान्मन एव पूर्वरूपं वागुत्तररूपं मनो वाक्प्राणस्त्वेव २३
संहितेति स एषोऽश्वरथः प्रष्टिवाहनो मनो वाक्प्राणसंहितः स्वर्गं लोकं गमय
ति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन

स्वर्गेण लोकेन सर्वमायुरेतीति नु मांडूकेया नाम् ॥२॥ शाकल्यस्य पृथिव्यग्निः पृ त्य १
थिवी वागनुव्याहारः सदीर्घेनिर्भुजः खलु वैवयं मध्यमो वाक्प्राणेन माताजा
माप्रज्ञा बाबूहकृतिर्वाल्लि सर्वमुत्तमं ॥३॥ अथ शाकल्यस्य पृथिवी पूर्वरूपं द्यौरु त्य ३
त्तररूपं वायुः संहिता वृष्टिः संधिः पर्जन्यः संधाता तदुतापि यत्रैतद्बलवदनुग्र
हृतान्महा मेघा वृष्टिं वर्षति द्यावापृथिव्यौ समधातामित्यधिदैवतमथाध्यात्मं
त्रे२ पुरुषोयं सर्वमांडं हेविदल्लेभवतस्त्वस्येदमेव पूर्वरूपमिदमुत्तररूपं तत्रायमं
तरेणाकाशो यथासौ द्यावापृथिव्योरंतरेणाकाशस्तस्मिंन्ने तस्मिन्नाकाशे
प्राणआयत्तो भवति यथामुष्मिन्नाकाशे वायुरायत्तो भवति यथामूनित्रीणि

ज्योतींष्येवमिमानिपुरुषेत्रीणिज्योतींषियथासौदिव्यादित्यएवमिदंशिरसि
चक्षुर्यथासावंतरिक्षेविद्युदेवमिदमात्मनिहृदयंयथायमग्निःपृथिव्यामेवमि
दमुपस्थेरेतएवमिवहस्मसर्वत्रात्मानमनुविधायाहेदमेवसर्वरूपमिद
मुत्तररूपंमनोवाक्प्राणाःसैवसंहितेतिसएषोऽश्वरथ्यःप्रष्टिवाहनोमनोवाक्
प्राणसंहितःस्वर्गंलोकंगमयतिसयएवमेतांसंहितां॰रेति॥४॥पृथिवीपूर्व
रूपंद्यौरुत्तररूपंवायुःसंहितादिशःसंधिरादित्यःसंधातेतिवैश्वामित्रइत्य २४
धिदैवतमथाध्यात्मंवाक्पूर्वरूपंमनउत्तररूपंप्राणःसंहिताश्रोत्रंसंधि
श्चक्षुःसंधातासयएवमेतांसंहितां॰रेति॥५॥अग्निःपूर्वरूपंचंद्रमाउत्तर

रूपंविद्युत्संहितेतिसूर्यदत्तइत्यधिदैवतमथाध्यात्मंवाक्पूर्वरूपंमनउत्तर
रूपंसत्यंसहितासयएवमेतांसंहितां॰रेति॥६॥पृथिवीपूर्वरूपंद्यौरुत्तररूपं
कालःसंहितेतिराधेयइत्यधिदैवतमथाध्यात्मंवाक्पूर्वरूपंमनउत्तररूपमा
त्मासंहितासयएवमेतांसंहितां॰रेति॥७॥वाक्पूर्वरूपंमनउत्तररूपंविद्या
संहितेतिपौष्करसादिःसयएवमेतांसंहितां॰रेति॥८॥अथातोऽनुव्याहाराःप्रा
णोवंशइतिविद्यात्सयएनंप्राणंवंशंब्रुवन्परमुपवदेदक्रुवन्कश्चिच्चेन्म
न्येतप्राणंवंशंसमधाःप्राणंवंशंसंदधन्नाक्रोषीत्यात्प्राणस्त्वावंशोहा
स्यतीत्येनंब्रूयादथचेदनाक्रुवन्मन्येतप्राणंवंशंसमधिसीस्तन्नानाकःसं

धातुंप्राणस्त्वावंशोहास्यतीत्येवैनंब्रूयाद्यथानुकथाचक्रवन्त्वाक्रवन्त्वाब्रूया
श।२ दंस्पासमेवयंत्तथास्यान्नलेवान्यत्कुत्रालाद्ब्राह्मणंब्रूयादतिद्धम्नएवब्राह्म
णंब्रूयान्नातिद्धम्नेनचब्राह्मणंब्रूयान्नमोस्तुब्राह्मणेभ्यइतिशौरवीरोमां श।३
डूकेयः॥१॥सयदिप्राणंवंशंक्रवंतंपरमुपवदेदशक्नुवंतंचेन्मन्येतप्राणंवंशं
म५ समधित्सिषंप्राणंवंशंसंधित्सितुंनशक्नोषीत्याथप्राणस्त्वावंशोहास्यती
त्येनंब्रूयादथयवेदशक्नुवंतंमन्येतप्राणंवंशंसमधित्सीस्तन्नाशकःसंधातुं
प्राणस्त्वावंशोहास्यतीत्येवैनंब्रूयाद्यथानुकथाञ्चक्रवंतंवाक्रवंतंवाब्रूयाद
श।१ स्पासमेवयंत्तथास्यान्नलेवान्यत्कुत्रालाद्ब्राह्मणंब्रूयादतिद्धम्नएवब्राह्म

श।१
णंब्रूयान्नातिद्धम्नेनचब्राह्मणंब्रूयान्नमोस्तुब्राह्मणेभ्यइतिशौरवीरो
मांडूकेयः॥१०॥अथातोनिर्भुजप्रवादाःपृथिव्यायतनंनिर्भुजंदिवाय ख्प।२
तनंप्रतृण्णमंतरिक्षायतनमुभयमंतरेणसयद्येनंनिर्भुजंब्रुवन्परमु
पवदेत्पृथिवींदेवतामारःपृथिवीत्वादेवतारिष्यतीत्येनंब्रूयादथयदिप्र
तृण्णंब्रुवन्परमुपवदेद्दिवंदेवतामारोद्यौस्त्वादेवतारिष्यतीत्येनंब्रूयाद
थयद्युभयमंतरेणब्रुवन्परमुपवदेदंतरिक्षंदेवतामारोंतरिक्षंत्वादेवता
रिष्यतीत्येनंब्रूयाद्यद्धिसंधिंविवर्तयतितन्निर्भुजस्यरूपमथयच्छुद्धेअक्ष
रेअभिव्याहरतितत्प्रतृण्णस्याग्रउएवोभयमंतरेणोभयंव्याप्तंभवत्यन्ना

द्यकामोनिर्भुजंब्रूयात्स्वर्गकामःप्रतृण्णमुभयकामउभयमंतरेणसयएनं
निर्भुजंब्रुवन्तमुपवदेदच्योष्ठाअवराभ्यांस्थानाभ्यामित्येनंब्रूयादथयदि
प्रतृण्णंब्रुवन्तमुपवदेदच्योष्ठाउत्तराभ्यांस्थानाभ्यामित्येवैनंब्रूयाद्यस्त्वे
वोभयमंतरेणाहतस्यनास्त्यपवादोयथानुकयाचब्रुवन्चाब्रुवन्चाब्रूया
२।५ दस्यासमेवयत्रयथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादतिक्रमणएवब्राह्म
णंब्रूयान्नातिक्रमेनचब्राह्मणंब्रूयान्नमोस्तुब्राह्मणेभ्यइतिशौरवीरो २।३ २६
मांडूकेयः॥११॥अथखल्वाहुर्निर्भुजवक्त्राःपूर्वमेवाक्षरंपूर्वरूपमुत्तरमु
त्तररूपंयकारवकारावंतरेणसासंहितेतिसयएवमेतांसंहितां॰रेति॥१२॥

अथवैवयंब्रूमोनिर्भुजवक्त्राःस्मइतिहस्माहह्रस्वोमांडूकेयःपूर्वमेवाक्षरंपूर्वरू
पमुत्तरमुत्तररूपंतद्यासौमात्रापूर्वरूपोत्तररूपेअंतरेणयेनसंधिंविवर्त्तयतिये
नमात्रामात्रंविजानातियेनस्वरास्वरंविज्ञापयतिसासंहितेतिसयएवमेतांसंहि
तां॰रेति॥१३॥अथहस्मास्यपुत्रआहमध्यमःप्रातिबोधीपुत्रोमगधवासीपू
र्वमेवाक्षरंपूर्वरूपमुत्तरमुत्तररूपंतद्यासौमात्रासंधिविज्ञापनीसामतद्भवतिसा
मैवाहंसंहितांमन्यइतितदेतदृचाभ्युदितं॥मानस्तेनेभ्योयेअभिद्रुहस्पदेनि
रामिणोरिपवोन्नेषुजागृधुः॥आदेवानामोहतेविव्रयोहृदिबृहस्पतेनपरः
साम्नोविदुरितिसयएवमेतांसंहितां॰रेति॥१४॥वाक्याएनसंधीयतइतिकौं

ठव्यः प्राणः पवमानेनपवमानोविश्वैर्देवैर्विश्वेदेवाःस्वर्गेणलोकेनस्वर्गो
लोकोब्रह्मणासैषावरपरासंहितासयएवमेतामवरपरांसंहितांवेदैवंहैव
सप्रजयापशुत्तिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसंधीयतेयद्येषावरपरा
संहितासयदिपरेणवोपस्पृष्टःस्वेनवार्थेनानिव्याहरेदनिव्याहरन्नेवविद्याद्दि
वंसंहिता [illegible] मगमद्धिडषोदे
नामभि३ वानभिव्याहारार्थमेवंभविष्यतीत्येतेनावरपरेणतथाहैवभवति ॥३५॥ माता २७
पूर्वरूपंपितोत्तररूपंप्रजासंहितेतिमार्गवस्तदेतदेकमेवसर्वमन्यन्नत्रंमा
ताचह्येवेदंपिताचप्रजाचसर्वंसैषादितिःसंहितादितिर्ह्येवेदंसर्वंयदिदंकिंचि
ञ्च द्वि श्वंगा ८

द्विश्वंभूतंतदेतदृचाभ्युदितम् ॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपि
तासपुत्रः ॥ विश्वेदेवाअदितिःपंचजनाअदितिर्जातमदितिर्जनित्वमिति
सयएवमेतांसंहितां०रति ॥३६॥ जायापूर्वरूपंपतिरुत्तररूपंपुत्रःसंहिता
रेतःसंधिःप्रजननंसंधानमितिस्थविरःशाकल्यःसैषाप्रजापतिसंहितास
यएवमेतांसंहितांवेदप्रजायतेप्रजयापशुत्तिर्यशरेति ॥३७॥ प्रज्ञापूर्वरूपंश्र
द्धोत्तररूपंकर्मसंहितासत्यंसंधानमितिकाश्यपःसैषासत्यसंहितातदाहु
र्येसत्यसंधादेवा इतिसयएवमेतांसंहितां०रेति ॥३८॥ वाक्संहितेतिपंचा
लचंडोवाचावैवेदाःसंधीयंतेवाचाछंदांसिवाचामित्राणिसंदधतितद्यत्रैत

चा१ दि२

द्धीतेवाग्भाषतेवावाचितदाप्राणोन्ववर्तिवा कदाप्राणंरेचयथयस्वपितिवातू
ष्णींवान्नवर्तिप्राणेतदावाग्भवतिप्राणस्तदावाचंरेळ्हितावन्योन्यंरेळ्हस्तदेतदृचा
भ्युदितम्॥ एकःसुपर्णःससमुद्रमाविवेशसइदंविश्वंभुवनंविचष्टे। तंपाके
नमनसापश्यमंतितस्तंमातारेळ्हिसउरेळ्हिमातरमितिवाग्वैमाताप्राणोवत्सः
सयएवमेतांसंहितां०रेति॥१९॥ बृहद्रथंतरेणरूपेणसंहितासंधीयतइतिता
र्क्ष्योवाग्वैरथंतरस्यरूपंप्राणोबृहत्ताभ्यामुखलुसंहितासंधीयतेवाचा
चप्राणेनचैतस्याहस्मोपनिषदिसंवत्सरंगारक्षयतइतितार्क्ष्यएतस्यांह
स्ममात्रायांसंवत्सरंगारक्षयतइतितार्क्ष्यसयएवमेतांसंहितां०रेति॥२०॥

२९

गतिःपूर्वरूपंनिवृत्तिरुत्तररूपंस्थितिःसंहितेतिजारत्कारवआर्तभागस्तस्या
मेतस्यांसंहितायांध्रुंसयोनिमेषाःकाष्ठाःकलाःक्षणामुहूर्त्ताअहोरात्राअर्ध
मासामासाऋतवःसंवत्सराश्चसंधीयंतेसैषासंहितैतान्कालान्संदधातिकालो
गतिनिवृत्तिस्थितीःसंदधातिगतिर्निवृत्तिस्थितितैरिदंसर्वसंधीयतइत्यधि
दैवतमथाध्यात्मंऋतंपूर्वरूपंनविष्यउत्तररूपंनवसंहितेतिकाव्यस्तदेत
दृचाभ्युदितं॥महत्तंनामगुह्यंपुरुस्पृग्येनभूतंजनयोयेनभव्यं॥प्रत्नंजातं
ज्योतिर्यदस्यप्रियंप्रियाःसमविशंतपंचेतिसयएवमेतांसंहितां०रेति॥२१॥
अथातोबालिशिखायनेर्वचःपंचेमानिमहाभूतानिसंभवंतीतिहस्माहवा

संधि॰४

खिद्रिरिखायनिःपृथिवीवायुराकाशमापोज्योतींषीत्येतानिमिथःसंहितानिभवं
त्यथयान्यन्यानिक्षुद्राणिमहाभूतैःसंधीयंतेसैषासर्वत्रसंहितासयएवमे
तांसंहितां॰रेति॥२२॥सर्वावाग्ब्रह्मेतिहस्माहलौहिक्योयेतुकेचनशब्दावाच
मेवतांविद्यात्तदप्येतदृषिराहाहंरुद्रेभिर्वसुभिश्चरामीतिसैषावाक्सर्वशब्दान्भ
वतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्व
र्गेणलोकेनसर्वमायुरेतियथाचैतद्ब्रह्मकामरूपिकामचारिभवत्येवंहैव २९
ससर्वेषुभूतेषुकामरूपीकामचारीभवतियएवंवेदयएवंवेद॥२३॥ ॥
आरण्यकेपंचमोध्यायः॥ ॥ॐप्राणोवंशइतिहस्माहस्थविरःशाकल्यस्त

यथाशालावंशेसर्वेन्येवंशाःसमाहिताःस्युरेवमेवैतस्मिन्प्राणेसर्वआत्मास
माहितस्तस्यैतस्यात्मनःप्राणऊष्मरूपमस्थीनिस्पर्शरूपंमज्जानःस्वररूप
मांसंलोहितमित्येतच्चतुर्थमक्षररूपमितित्रयंत्वेवनएतत्त्रोक्तमितिहस्मा
हह्रस्वोमांडूकेयस्तस्यैतस्यत्रयस्यत्रीणीतःषष्टिशतानिभवंतिसंधीनांत्री
णीतस्तानिसप्तविंशतिशतानिभवंतिसप्तवैविंशतिशतानिसंवत्सरस्याहोरा
त्राणांतत्संवत्सरस्याहोरात्राएवाप्नोतिसएषसंवत्सरसंमानश्चक्षुर्मयःश्रोत्र
मयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतंसंवत्सरसंमानंचक्षुर्म
यंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयं[illegible]त्मानंवेदसंवत्सरस्यसायुज्यंस मा१

लोकतां सरूपतां सनक्षत्रतामश्नुते पुत्री पशुमान्भवति सर्वमायुरेतीत्य
स्यारुणिके यो वेदयांचक्रे ॥१॥ अथ कौंठरव्यस्त्रीणि षष्टिश्शतान्यक्षराणां
त्रीणि षष्टिश्शतान्यूष्मणां त्रीणि षष्टिश्शतानि संधीनां यान्यक्षराण्यवोचामा
हानि तानि यानूष्मणो रात्रयस्तायां संधीनवोचामाहोरात्राणां ते संधयइ
त्यधिदैवतमथाध्यात्मं यान्यक्षराण्यधिदैवतमवोचामास्थीनि तान्यध्यात्मं
यानूष्मणोधिदैवतमवोचाम मज्जानस्तेऽध्यात्ममेषत्वइ वै संप्रति प्राणेनय
न्मज्जैतद्इतो नवास्तते प्राणाद्धेतसः सिद्धिरस्तिय स्नावास्ते
प्राणाद्धेतः सिच्येत्तस्येतन्नसंतवेद्यां संधीनधिदैवतमवोचाम पर्वाणि तान्य

ध्यात्मं तस्यैतस्यास्थ्नां मज्ज्ञां पर्वणामिति पंचैतश्चत्वारिंशच्छतानि भवंति सं
धी नां पंचैतस्त्वदशीतिसहस्रा भवल्यशीतिसहस्रबाधकलिनो बृहतीरहर
हनि संपादयंति स एषोऽहः संमानश्चक्षुर्मयः श्रोत्रमयश्छंदोमयो मनोमयो
वाङ्मय आत्मा स य एवमेतमहः संमानं चक्षुर्मयं श्रोत्रमयं छंदोमयं मनो
मयं वाङ्मयमात्मानं वेदाक्रां सायुज्यं सलोकतां सरूपतां सनक्षत्रतामश्नु
ते पुत्री पशुमान्भवति सर्वमायुरेति ॥२॥ चत्वारः पुरुषा इति बाध्वः शरी
रपुरुषः छंदः पुरुषो वेदपुरुषो महापुरुष इति शरीरपुरुष इति यमवो
चाम य एवायं दैहिक आत्मा तस्यैतस्य यो यमशरीरः प्रज्ञात्मा स रसश्छं

बोअर्क्षं २

बाध्व ३

दःपुरुषइतियमवोचामाक्षरसमाम्नायएवतस्यैतस्याकारोरसोवेदपुरु
षइतियमवोचामयेनवेदान्वेदयतऋग्वेदंयजुर्वेदंसामवेदमितितस्यैतस्यब्र
ह्मारसस्तस्माद्ब्रह्मिष्ठंब्रह्माणमृत्विजंकुर्वीतयोयज्ञस्योल्बणंविद्यान्महापु
रुषइतियमवोचामसंवत्सरएवतस्यैतस्यासावादित्योरसःसयश्चायम
शारीरःप्रज्ञात्मायश्चासावादित्यएकमेतदितिविद्यात्तदेतदृचाभ्युदितं।३। ३१
चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः।आप्राद्यावापृथिवी
अंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्चेति।तामेवानुविधंसंहितांसंधीय
मानांमन्यतइतिहस्माहवात्स्यएतमुहैवबह्वृचामहत्युक्थेमीमांसंतएतम

ग्नावध्वर्यवएतंमहाव्रतेछंदोगाएतमस्यामेतमंतरिक्षएतंदिव्येतमादि
२वायावेतं त्येतंचंद्रमस्येतंनक्षत्रेष्वेतमप्स्वेतमोषधीष्वेतंसर्वेषुभूतेष्वेतमक्षरेष्वेतमेवब्र
ह्मेत्युपासतेतदेतदृचाभ्युदितं।।४।।उद्वयंतमसस्परिज्योतिष्पश्यंतउत्त
रं।देवंदेवत्रासूर्यमगन्मज्योतिरुत्तममितिसएषोक्षरसमाम्नायश्चक्षुर्मयः
श्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतमक्षरसमाम्नायं
चक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयं[illegible]त्मानंपरस्मैशंसति मा३
दुग्धदोहाअस्यवेदाभवंत्यभागोवाचिभवत्यभागोनाकेतदेतदृचाभ्युक्त
दितं।५।यस्तित्याजसखिविदंसखायंनतस्यवाच्यपिभागोअस्तियदीं

रणोस्य लोकं स्वएगो ति न हि प्रावदस्तु कृतस्य पंथामिति नास्यान्क्ले वा चोभागे
अस्तीसेव तदाह तन्न परस्मा एतदहः शंसेन्नाग्निं चिनुयान्न महाव्रतेन स्तु
यान्नैतदात्मनो पिहीया इति स यश्चायम शरीरः प्रज्ञात्मा यश्चासावादित्य ए
कमेतदित्य वोचाम तौ यत्र विप्रदृश्येते ॥६॥ चंद्रमा इवादित्यो दृश्यते न रश्म
यः प्रादुर्भवंति लोहिनी द्यौर्भवति यथा मंजिष्ठा व्यस्तः पायुर्भवति संपरेतोस्मा
त्मान चिरमिव जीविष्यतीति विद्यादथ यत्करणीयं मन्येत तत्कुर्यादथाप्याद ३२
२ शिरसं वा र्शे वोदके वा जिह्मशिरसं वात्मानं पश्येन्न वा पश्येत्तदप्येवमेव विद्यादथापि
छिद्रा या भवति न वा भवति तदप्येवमेव विद्यादथापि छिद्र इवादित्यो दृश्यना

भिरिव रथ्याछेत्तदप्येवमेव विद्यादथापि नील इवाग्निर्दृश्येत यथा मयूरग्री
वा महामेघे वा मरीचीरिव पश्येदनभ्रे वा विद्युतः पश्येदभ्र एनां न पश्येत्तदप्ये
३ मेव वमेव विद्यादथाप्यपिधायाक्षिणी उपेक्षेत यत्रैतद्बराटकानीव न पश्येत्तदप्ये
वमेव विद्यादथाप्यपिधाय कर्णा उपासीत य एषोग्नेरिव ज्वलतः शब्दोस्य
स्यैवोपब्दिस्तन्न यदा शृणुयात्तदप्येवमेव विद्यादथापि विपर्यस्ते कनीनिके
दृश्येते छिजिह्मे वा न वा दृश्येते तदप्येवमेव विद्यादथातोक्ष्णतो मतो विज्ञा
तो दृष्टो नादिष्टो घुष्टः श्रोता मंता विज्ञाता द्रष्टा देष्टा घोष्टा सर्वेषां भूतानामं
तरः पुरुषः स म आत्मेति विद्यात्सउ ऋा मन्नेवैतमशरीरं प्रज्ञात्मानमत्तिसं

पद्यतेविजहातीतरंदैहिकंसैषासर्वस्यैवाचउपनिषत्सर्वाहिवैमाःसर्वस्यैवाचउ
पनिषदिमांत्वेवमाचक्षते॥७॥पृथिव्यारूपंस्पर्शाअंतरिक्षस्योष्माणोदिवःस्व
राअग्नेरूपंस्पर्शावायोरूष्माणआदित्यस्यस्वराऋग्वेदस्यरूपंस्पर्शायजुर्वेद
स्योष्माणःसामवेदस्यस्वरारथंतरस्यरूपंस्पर्शावामदेव्यस्योष्माणोबृहतः
स्वराःप्राणस्यरूपंस्पर्शाअपानस्योष्माणोव्यानस्यस्वराःप्राणस्यरूपंस्पर्शा
अपानस्योष्माणोमनसःस्वराःप्राणस्यरूपंस्पर्शाअपानस्योष्माणउदान ३३
स्यस्वराइतिपुनर्दत्तएषहवैसर्वांवाचंवेदयएवंवेद॥८॥अथखल्वियंदे
वीवीणाभवतितदनुकृतिरसौमानुषीवीणाभवतितद्यथेयंशीर्ष्णवत्यूर्ण

८१

८१

वतीभवत्येवमेवासौशीर्ष्णवत्यूर्णवतीभवतितद्यथास्याःशिरएवममु
ष्याःशिरस्तद्यथास्यैवंशएवममुष्यादंडस्तद्यथास्याउदरमेवममुष्याअंभ
णंतद्यथास्यैमुखनासिकेअक्षिणीइत्येवममुष्याश्छिद्राणितद्यथास्याअं
गुलिनिग्रहाउपस्तरणानीत्येवममुष्याःपर्वाणितद्यथास्याअंगुलयएवम
मुष्यास्तंत्रयस्तद्यथास्यैजिह्वैवममुष्यावादनंतद्यथास्याःस्वराएवममुष्याःस्व
रास्तद्यथाहैवेयंरोमशेनचर्मणापिहिताभवत्येवमेवासौरोमशेनचर्मणा
पिहिताभवतिरोमशेनहस्मचर्मणापुरावीणाअपिदधतिसैषादैवीवीणा
भवतिसयएवमेतांदैवींवीणांवेदश्रुतवदनोभवतिभूमिंमस्यकीर्ति

[illegible]र्नवतिश्शुश्रूषंतेहास्यपर्षत्सुभाष्यमाणस्येदमस्तुयदस्मीहत्तेय
त्रार्यवाग्वदंतिविदुरेनंतत्र॥२॥ अथातस्तांडबिंदस्यवचस्तद्यथेयमकुश
लेनवादयित्रावीणारब्धानकृत्स्नंवीणार्थंसाधयत्येवमेवाकुशलेनवक्त्रा
वागारब्धानकृत्स्नंवागर्थंसाधयतितद्यथाहैवेयंकुशलेनवादयित्रावीणा
रब्धाकृत्स्नंवीणार्थंसाधयत्येवमेवकुशलेनवक्त्रावागारब्धाकृत्स्नंवागर्थं ३५
साधयतितस्यैवाएतस्यैवीणायैयालिबिःसासंहितैति कात्यायनीपुत्रो
षा।२ जातूकर्ण्योथिहस्मैतत्ल[illegible]हारितोब्राह्मणमेवोदाहरति॥१०॥ प्रजापतिः
प्रजाःसृष्ट्वाव्यस्रंसतसछंदोभिरात्मानंसमदधत्तद्यछंदोभिरात्मानं

समदधत्तस्मात्संहितातस्यैवाएतस्यैसंहितायैणकारोबलंषकारःप्राण
आत्मासंहितायैषाद्धुडुमिश्राविद्रूतिस्तानिनखानिरोमाणिव्यंजनानीति
सयोत्रविचिकित्सेत्स[illegible]णकारमेवब्रूयाद्दत्तेषकारमितिसणकारमेवब्रू
यादेवमेवयोत्रविचिकित्सेत्सषकारमेवब्रूयाद्दत्तेणकारमितिसषका
रमेवब्रूयात्तौवाएतौणकारषकारौविद्वान्नलुसंहितमच्चोधीयीतायुष्य
मितिविद्यादेवमेवविद्याद्यदस्यवागितिहासपुराणंयच्चान्यत्किंचिद्ब्रह्मोद द्रु३
ह्येवाधीयीततदेतत्प्येवमेवविद्यात्तेयद्वयमनुसंहितमृचोधीमहेयच्चसां
दूकेयीयमध्यायंप्रब्रूमस्तेननोणकारषकारात्रपाप्ताविति हस्माहह्रस्वो

मांडूकेयोथयदक्षरमनुसंहितमचोधीमहेयच्चस्वाध्यायमधीमहेतेननोण
कारषकारान्तरापाप्तावितिहस्माहस्थविरःशाकल्यस्तद्धस्मवैतद्विद्वांसआहुः
कावषेयाःकिमर्थावयंयदध्यामहेकिमर्थावयमध्येष्यामहेवाचिहिप्राणंजु
हुमःप्राणेवाचंयोह्येवप्रभवःसएवाप्ययइतितताएताःसंहितानानंतेवा
सिनेब्रूयान्नासंवत्सरवासिनेनाब्रह्मचारिणेनावेदविदेनाप्रवक्त्रइत्याचा
र्यइत्याचार्याः॥११॥आरण्यकेषष्ठोध्यायः॥ ॥तत्सवितुर्वृणीमहेवयंदे
वस्यभोजनं।श्रेष्ठंसर्वधातमंतुरंभगस्यधीमहि।तत्सवितुर्वरेण्यंभर्गोदे
वस्यधीमहि।धियोयोनःप्रचोदयात्।अदब्धंमनइषिरंचक्षुःसूर्योज्योति

षांश्रेष्ठोदीक्षेमामाहिंसीः॥१॥योहवैज्येष्ठंचश्रेष्ठंचवेदज्येष्ठश्चहवैश्रेष्ठ
श्चस्वानांभवतिप्राणोवैज्येष्ठश्चश्रेष्ठश्चयोहवैवसिष्ठांवेदवसिष्ठोहस्वा
नांभवतिवाग्वैवसिष्ठायोहवैप्रतिष्ठांवेदप्रतिहतिष्ठत्यस्मिंश्चलोकेमुष्मिं
श्चचक्षुर्वैप्रतिष्ठायोहवैसंपदंवेदसंहास्मैकामाःपद्यंतेश्रोत्रंहवाउसंपद्यो
हवाआयतनंवेदायतनंहस्वानांभवतिमनोवाआयतनमथहवैदेवताः
प्रजापतिंपितरमेत्याब्रुवन्कोवैनःश्रेष्ठइतिसहोवाचप्रजापतिर्यस्मिन्वउत्
क्रांतेशरीरंपापिष्ठमिवमन्येतसवैश्रेष्ठइति॥२॥साहवागुच्चक्रामस्वथा
मूकाअवदंतःप्राणंतःप्राणेनपश्यंतश्चक्षुषाशृण्वंतःश्रोत्रेणध्यायंतोम

नसैवमिति ॥३॥ चक्षुर्होच्चक्राम यथांधा अपश्यंतः प्राणंतः प्राणेन वदंतो वा
चा शृण्वंतः श्रोत्रेण ध्यायंतो मनसैवमिति ॥४॥ श्रोत्रं होच्चक्राम यथा बधिरा
अशृण्वंतः प्राणंतः प्राणेन वदंतो वाचा पश्यंतश्चक्षुषा ध्यायंतो मनसैवमि
ति ॥५॥ मनो होच्चक्राम यथा बाला अमनसः प्राणंतः प्राणेन वदंतो वाचा
पश्यंतश्चक्षुषा शृण्वंतः श्रोत्रेणैवमिति ॥६॥ प्राणो होच्चक्राम ततस्तद्यथे ३६
ह सैंधवः सुहयः पड्वीशशंकून्समुखिदेदेवमसौ प्राणान्समखिदत्ते ह स
मेत्योचुर्भगवन्मोत्क्रमीरिति स होवाच प्राणः किं मेऽन्नं भविष्यतीति यत्किंचा श्र२
श्वभ्य आ शकुनिभ्य इति किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा अय

ल्हेषीर

मशिष्यन्पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधाति लंभुको हास्य वासो भवत्यन
ग्नो ह भवति वनस्पते शतवल्शो विरोहेति यं मा लेखीरंतरिक्षं मा मा हिंसी
रिति याज्ञवल्क्यः तद्धस्मैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवा
चाप्येवं शुष्कस्य स्थाणोः प्रब्रूयाज्जायेरन्नस्य शाखाः प्ररोहेयुः पलाशानी
ति ॥७॥ अथ यदिमहज्जिगमिषेत्त्रिरात्रं दीक्षित्वामावास्यायां सर्वौषधस्य
मंथं दधिमधुस्तामुपमंथ्याग्निमुपसमाधाय सरिसमुह्य परिस्तीर्य पर्युक्ष्य द
क्षिणं जान्वाच्योत्तरतोऽग्नेः कंसे मंथं कृत्वा हुत्वाहोमान्मंथे संपातमानये
ज्ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मंथे संपातमानयेद्वसिष्ठायै स्वाहेत्यग्नौ हु

त्वा॰ प्रतिष्ठायै स्वाहेत्यग्नौ जुहुयात्॰ संपदे स्वाहेत्यग्नौ जुहुयात्॰ आयतनाय स्वा
हेत्यग्नौ जुहुयात्॰ तत्सवितुर्वृणीमह इति पच्छः प्राश्नाति तत्सवितुर्वरेण्यमिति पच्छ
आचामति महाव्याहृतिभिश्चतुर्थं निर्णिज्य कांस्यं चर्मणि वा स्थंडिले वा सं
विशति स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात्समृद्धं कर्मेति विद्यात्॥ ९॥
आरण्यके सप्तमोऽध्यायः॥ ॐ॥ अथातोऽध्यात्मिकमांतरमग्निहोत्रमित्याचक्ष
तऽएता ह वै देवताः पुरुषएव प्रतिष्ठिताग्निर्वाचि वायुः प्राणआदित्यश्चक्षु
षि चंद्रमा मनसि दिशः श्रोत्रआपो रेतस्येता सुह वै सर्वासु ऊतं तन्नवति य एवं
विद्वानश्नाति च पिबति चाशयति च पाययति च सोऽश्नाति स पिबति स त

[illegible]

प्पति स तर्पयति॥ १॥ स तत्रो वाचं तर्पयति वाक्तत्राग्निं तर्पयत्यग्निस्तत्रः पृथि
वीं तर्पयति पृथिवी तत्राय त्किंच पृथिव्यापिहितं तन्नवङ्क्षविष्यङ्क्तं तं तत्सर्वं तर्प
यति य एवं विद्वानश्नाति च पिबति चाशयति च पाययति च सोऽश्नाति स पिब
ति स तर्प्पति स तर्पयति॥ २॥ स तत्रः प्राणं तर्पयति प्राणस्तत्रो वायुं तर्पय
ति वायुस्तत्र आकाशं तर्पयत्याकाशस्तत्रो य त्किंचाकाशेनापिहितं तन्नवङ्क्ष
विष्यङ्क्तं तं तत्सर्वं तर्पयति य एवं विद्वांस्तर्पयति॥ ३॥ स तत्रश्चक्षुस्तर्पयति
चक्षुस्तत्र आदित्यं तर्पयत्यादित्यस्तत्रो दिवं तर्पयति द्यौस्तत्राय त्किंच दिवा
पिहितं तन्नवङ्क्षविष्यङ्क्तं तं तत्सर्वं तर्पयति य एवं विद्वा॰ तर्पयति॥ ४॥ स तत्रो

मनस्तर्पयति मनस्तृप्तं चंद्रमसं तर्पयति चंद्रमास्तृप्तो नक्षत्राणि तर्पयति नक्षत्रा
णि तृप्तानि मासांस्तर्पयंति मासास्तृप्ता अर्द्धमासांस्तर्पयंत्यर्द्धमासास्तृप्ता अ
होरात्रे तर्पयंत्यहोरात्रे तृप्ते ऋतूंस्तर्पयत ऋतवस्तृप्ताः संवत्सरं तर्पयंति संवत्स
रस्तृप्तो यत्किंच संवत्सरेणापिहितं भवङ्कविष्पङ्कतं॰ तर्पयति ॥५॥ स तृप्तः श्रो
त्रं तर्पयति श्रोत्रं तृप्तं दिशस्तर्पयति दिशस्तृप्ता अवांतरदिशस्तर्पयंत्यवांतर
दिशस्तृप्ता यत्किंचावांतरदिग्भिरपिहितं भवङ्कविष्प॰ तर्पयति ॥६॥ स तृप्तो
रेतस्तर्पयति रेतस्तृप्तमपस्तर्पयत्यापस्तृप्ता नदीस्तर्पयंति नद्यस्तृप्ताः समु
द्रं तर्पयंति समुद्रस्तृप्तो यत्किंच समुद्रेणापिहितं भवङ्कविष्पत्तं॰ तर्पयति ॥७॥

३ अद्भूतं तत्सर्वं तर्पयति य एवं॰

स तृप्तस्तदेतद्वैराजं दशविधमग्निहोत्रं भवति तस्य प्राण एवाहवनीयोऽपानो
गार्हपत्यो व्यानोऽन्वाहार्यपचनो मनो धूमो मन्युरर्चिर्दंता अंगाराः श्रद्धा पयो
वाक्समित्सत्यमाहुतिः प्रज्ञात्मा सरसस्तदेतद्वैराजं दशविधमग्निहोत्रं
हुतं भवति रोहाभ्यां रोहाभ्यामस्यारूढं हमन्ति स्वर्गं लोकं गमयति य एवं वि
द्वानश्नाति च पिबति खाऽदायति च पाययति खाऽदयथ य इदमविद्वानग्निहोत्रं जु
होति यथाऽङ्गारानपोह्य भस्मनि हुतं तादृक्तत्स्यात्तादृक्तत्स्यात् ॥८॥
॥ आरण्यकेऽष्टमोऽध्यायः ॥ ॐ ॥ प्रजापतिर्वा इमं पुरुषमुदंचत तस्मिन्ने
ता देवता आवेशयद्वाच्यग्निं प्राणे वायुमपाने वैद्युतमुदाने पर्जन्यं च

१२

क्षुष्यादित्यं मनसि चंद्रमसं श्रोत्रे दिशः शरीरे पृथिवीं रेतस्यपो बलमिंद्रं मन्या
वीशानं मूर्धन्याकाशमात्मनि ब्रह्म स यथा महानमत्रकुंभः पिन्वमानस्ति
ष्ठेदेवं हैव स तस्थावथ ह इमा देवता ईक्षांचक्रिरे किमयमस्मान्निः पुरुषः क
रिष्यति किं वा वयमनेन हंतास्माच्छरीरादुत्क्रमामेति ता होच्चक्रमुरथ हेदं
शरीरं रिक्तमिव परिसुषिरं सहेक्षांचक्रे प्रजापती रंध्रायनमंत्रेहं ताह इमा
अशनायापिपासाभ्यामुपसृजा इति ता होपसृजे ता होपसृष्टाः सुखमल
भमाना इममेव पुरुषं पुनः प्रत्याविविशुः ॥१॥ वाङ्ममेत्यग्निराविवेश प्रा
णो ममेति वायुराविवेशापानो ममेति वैद्युत आविवेशोदानो ममेति प

३२

र्जन्य आविवेश चक्षुर्ममेत्यादित्य आविवेश मनो ममेति चंद्रमा आविवेश
श्रोत्रमस्माकमिति दिश आविविशुः शरीरं ममेति पृथिव्याविवेश रेतो स्मा
कमित्याप आविविशुर्बलं ममेतींद्र आविवेश मन्युर्ममेतीशान आविवेश
मूर्धा ममेत्याकाश आविवेशात्मा ममेति ब्रह्माविवेश स यथा महान्हृद आ
का५ ईन्नपरिसिक्तो मूलस्तिष्ठेदेवं हैव स तस्थौ ॥२॥ अथायं पुरुषः प्रैष्यन्पुरा संवत्स
रात्संवत्सरस्य दृष्टीः पश्यति छिद्रा छाया भवति न वात्तवति महाभ्रे घे वा मरी
तं२ चीरिव पश्येदंनभ्रे वा विद्युतः पश्येदत्र एनां न पश्येद्धिरणी वापिधाय बरा
टकानीव न पश्यति कर्णौ वापिधायोपद्धिमिव नश्शृणोति नास्मिंल्लोके रमते ने

२ शरीरं प्रक्षालोहन्ति
२ पञ्चदन्तानि

रत्नं ३

नंमनश्छेदयतीतिप्रत्यक्षदर्शनानि॥३॥अथस्वप्नाःपुरुषंकृष्णंकृष्णदंतंपश्य
तिसएनंहंतिवराहएनंहंतिमर्कटएनंहंतिबिसानिखादयतिसुवर्णंभक्षयित्वा
वगिरत्येकंपौंडरीकंधारयतिगांसवत्सांदक्षिणामुखोनलदमालीव्राजय
तिसएतेषांकिंचित्पश्येत्पांडुदर्शनांकालींस्त्रियंमुक्तकेशांमुंडांस्तैलाभ्यंगः
कौसुंभपरिधानंगीतान्कष्ट्रारोहएवंदक्षिणाशागमनादीनिवीक्ष्योपोष्यपा
यसंस्थालीपाकंश्रपयित्वासरूपवत्सायागोःपयसिनत्वेवतुकृष्णायाअग्निमु
पसमाधायपरिसमुह्यपरिस्तीर्यपर्युक्ष्यदक्षिणंजान्वाच्यस्रुवेणाज्याहुतीर्जु
होति॥४॥वाचिमेग्निःप्रतिष्ठितःस्वाहाप्राणेमेवायुःप्रतिष्ठितःस्वाहापानेमे

उद्गमति ३

मुंजैते भमा

६०

वैद्युतःप्रतिष्ठितःस्वाहौदानेमेपर्जन्यःप्रतिष्ठितःस्वाहाचक्षुषिमेआदित्यःप्र
तिष्ठितःस्वाहामनसिमेचंद्रमाःप्रतिष्ठितःस्वाहाश्रोत्रेमेदिशःप्रतिष्ठिताःस्वाहा
शरीरेमेपृथिवीप्रतिष्ठितास्वाहारेतसिमेआपःप्रतिष्ठिताःस्वाहाबलेमइंद्रःप्र
तिष्ठितःस्वाहामन्यौमईशानःप्रतिष्ठितःस्वाहामूर्द्धनिमेआकाशःप्रतिष्ठितः
स्वाहात्मनिमेब्रह्मप्रतिष्ठितंस्वाहेत्यथैतदाज्यावशेषंस्थालीपाकेसमवनिनीय
स्थालीपाकस्योपघातंजुहोति॥५॥वाचिमेग्निःप्रतिष्ठितोवाग्हृदयेहृदयमा
त्मनितत्सत्वंदेवानांमाहमकामोमरिष्याम्यन्नवानन्नादोभूयासंस्वाहाप्रा
णेमेवायुःप्रतिष्ठितःप्राणोहृदयेहृदयमात्मनितत्सत्वंदेवानांमाहमकामो

मरिष्याम्यन्नवानंदौनोन्नयासंस्वाहाऽपानेमेवेद्यतःप्रतिष्ठितोऽपानोहृदये
हृदय०स्वाहोदानेमेपर्जन्यःप्रतिष्ठितउदानोहृदयेहृदय०स्वाहाचक्षुषिम
आदित्यःप्रतिष्ठितश्चक्षुर्हृदयेहृदय०स्वाहामनसिमेचंद्रमाःप्रतिष्ठि
तोमनोहृदयेहृदय०स्वाहाश्रोत्रेमेदिशःप्रतिष्ठिताश्श्रोत्रंहृदयेहृदय०स्वा
हाशरीरेमेपृथिवीप्रतिष्ठिताशरीरंहृदयेहृदय०स्वाहारेतसिमआपःप्रतिष्ठि
तारेतोहृदयेहृदय०स्वाहाबलेमइंद्रःप्रतिष्ठितोबलंहृदयेहृदय०स्वाहा
मन्यौमईशानःप्रतिष्ठितोमन्युर्हृदयेहृदय०स्वाहामूर्द्धनिमआकाशःप्र
तिष्ठितोमूर्द्धाहृदयेहृदय०स्वाहाऽऽत्मनिमेब्रह्मप्रतिष्ठितमात्माहृदयेहृ

५१

दय०स्वाहेत्यथैतत्स्थाल्लीपाकशेषमात्मनिसमवनिनीयजुहोति।द्वात्रे
त्रमा।जागतंमेयस्त्रैष्टुभंनोहमोह्मिहंसीसंकाकुनंरंजतंस्वाराज्यंसुवर्णंगाय
त्रंमन्नंवैराजंतत्त्रिरानुष्टुभंनाकंसाम्राज्यंबृहस्पतिर्बार्हतंब्रह्मपांक्तंप्रजाप
तिरातिछंदसंसावित्रीसर्वविदछंदसेनछंदसेति।।१७।।अश्मेवस्थिरोबसानि
जागतेनछंदसापुरुषोमणिःप्राणःसूत्रमन्नंग्रंथिस्तंग्रंथिमुद्रुथ्नाम्यन्नका
मोमत्यवेब्राह्मणमपिसर्वमायुरशीयायुष्मान्महाम्मकामोमरिष्याम्यन्नवा
नंनादोन्नयासंस्वाहाऽयद्वस्थिरोवसानित्रैष्टुभेनछंदसापुरुषोमणिःप्राणः
सूत्रमन्नंग्रंथिस्तंग्रंथिमुद्रुथ्नाम्यन्नकामोमत्यवेब्राह्मणमपिसर्वमायुरशी

यांसुष्मान्महामकामोमरिष्यास्पन्नवानन्नादोभूयासंस्वाहा लोहमिवस्थिरो
वसान्यौष्णिहेनछंदसापुरुषोमणिः प्राणः ० स्वाहा सीसमिवस्थिरोवसानिका
कुभेनछंदसापुरुषोमणिः ० स्वाहा रजतमिवस्थिरोवसानिस्वाराज्येनछं
दसापुरुषोमणिः ० स्वाहा सुवर्णमिवस्थिरोवसानिगायत्रेणछंदसापुरुषो
मणिः ० स्वाहाऽन्नमिवस्थिरोवसानिवैराजेनछंदसापुरुषोमणिः ० स्वाहा त
न्तिरिवस्थिरोवसान्यानुष्टुभेनछंदसापुरुषोमणिः ० स्वाहा नाकमिवस्थिरोव
सानिसाम्राज्येनछंदसापुरुषोमणिः ० स्वाहा बृहस्पतिरिवस्थिरोवसानिबा
र्हतेनछंदसापुरुषोमणिः ० स्वाहा ब्रह्मेवस्थिरोवसानिपांक्तेनछंदसापुरुषोम

णिः ० स्वाहा प्रजापतिरिवस्थिरोवसान्यतिछंदसेनछंदसापुरुषोमणिः ०
स्वाहा सावित्री [illegible] वस्थिरोवसानिसर्ववेदछंदसेनछंदसापुरुषोमणिः
प्राणः सूत्रमन्नंग्रंथिस्तंग्रंथिमुद्ग्रथ्ना म्पन्नकामोमरत्यवैब्राह्मणमपिसर्व
मायुरश्नीयांसुष्मान्महामकामोमरिष्याभ्पन्नवानन्नादोभूयासंस्वाहे
तिप्रियायैवाजायायैप्रियायवांतेवासिनेन्यस्मैवापियस्मैकामयेततस्मा
उच्छिष्टंदद्यात्सहापिशतंवर्षाणिजीवतिपुनःपुनःप्रयुंजानोजीवत्येवजीव
त्येव ॥ ९ ॥ आरण्यकेनवमोध्यायः ॥ ॐ ॥ हस्तिवर्चसंप्रथतांबृहद्वयोयद्दि
त्यैतन्वः संबभूव। तन्मह्यंसमदुः सर्वएतत्त्रादित्यासोअदित्याः संविदा

नाः॥ यत्तेवर्चोजातवेदोबृहद्भवत्याहितं। तेनमावर्चसात्वमग्नेवर्चस्विनंकुरु॥२॥
यच्चवाचावाकुरुषेयच्चहस्तिष्वाहितं। सुवर्णेगोषुयद्वर्चोमयितद्धस्तिवर्चसं॥३॥
यदक्षेषुहिरण्येषुगोष्वश्वेषुयद्यशः। सुरायांसिच्यमानायांमयितद्धस्तिवर्चसं॥४॥
मयिभर्गोमयिमहोमयियज्ञस्ययद्यशः॥ तन्मयिप्रजापतिर्दिविदिवमिवदृंह
तु॥१॥ अश्विनासारघेणमासमङ्क्तान्मधुनापयः॥ यथामधुमतीवाचमाव
दानिजनेषु॥ घृतादुल्लुप्तोमधुमान्पयस्वान्धनंजयोधरुणोधारयिष्णुः। रुजं ४२
सपत्नानधरांश्चकृण्वन्नारोहमांमहतेसौभगाय॥ प्रजापतेनत्वदेतान्यन्यो
विश्वाजातानिपरिताबभूव। यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयो

रयीणां॥ अयंसनोनुदतांमेसपत्नानिंद्रइववृत्रंपृतनासुसाढ्हा। अग्नि
रिवकक्षंबिभ्रतःपुरुत्रावातेषुनस्तिग्मजंभोनुमाष्टि॥ अयंसनोयोनुवादी
कीलइववृत्रंविपुरोरुरोज। अनेनेंद्रोविमृधोविहत्याशत्रूयतामाभराभो
जनानि॥१॥ जयेंद्रशत्रूंजहिशूरदस्यून्वृत्रंहत्वेवकुलिशेनाविदृश्च।
ऊधइवशापास्त्रणुदाससपत्नाञ्जहिघ्नन्सपत्नान्स्वधितिर्वनेव॥ अनुदृश्चम
ध्यात्प्रतिदृश्चोपरिष्टाद्विदृश्चपश्चात्प्रतिशूरवृश्च। त्वयाप्रणुत्तान्मघ
वन्नमित्रांक्रूरेरीषंतंमरुतोनुयांतु॥ त्वांरुद्रैर्हीतितिःपिन्वमानाइंद्रंम
न्वानामरुतोजुषंतांसुपर्णाःकंकाःप्रमृशंत्वेनान्महीयतांदृष्टीवर्धनेषु॥३

अस्तणुत्रस्यमघवन्नतन्यतो विश्वगिंद्रस्यगाः पतंतु। माज्ञातारंणिप्सतमा
प्रतिष्ठामिहो विघ्नानामुपयातिमत्कं॥४॥ अग्नेयशस्विन्यशसेसमर्पयेंद्रवती
मपचितिमिहावह॥ अयंमूर्द्धापरमेष्ठीसुवर्च्चाः सजातानामुत्तमश्लोको
अस्तु॥५॥३॥ भद्रंपश्येमउपसेदुराग्रे। ततोदीक्षामृषयःस्वर्विदः। ततःक्ष
त्रंबलमोजश्चजातंतदस्मैदेवाअभिसन्नमंतां॥१॥ धाताविधातापरमोतसं
दृक्प्रजापतिःपरमेष्ठीसुवर्चाः। स्तोमांछंदांसिनिविदोमआहुरेतस्मैराष्ट्र
मभिसन्नमंतां॥२॥ अभ्यावर्त्तध्वमुपसेवताग्निरयंशास्ताधिपतिर्नोअस्तु॥
अस्यविज्ञानमनुसंरभध्वमिमंपश्चादनुजीवाथसर्वे॥३॥ अलदर्भोनामजातो

सिपुरासूर्यस्यपुरोषसः। तंत्वासपत्नःक्षपणंवेदाथोविष्टंभजंभनं॥४॥ नार्द्धेत्र
त्रमीयेततरेछिषंतंकल्पेतवाकंपृत्तनाःसहेत। अमायुकेतस्यद्विषंतमाङ्गु
रिराममणिंबैल्वंयोबिभर्त्ति॥५॥ नससुप्तमश्नातिनकिल्बिषंदत्तंनैनंदिव्यो
वरुणोहंतिभीतं। नैनंक्रुद्धंमन्यवोग्निमंतीराममणिं॰॥१॥ नास्यत्वचंहिंस
तिजातवेदानमांसमश्नातिनहंतितानि। शतायुरस्मिंजरदष्टिःप्रेतीरा॰॥२॥
नास्यप्रजाउष्यतिजायमानानश्रैलगोभवतिनपापकृत्या। नान्यांस्त्रिय
स्तस्यकुलेषुजायतंड्रा॰॥३॥ नास्यापवादानप्रवातकागृहेनसंपतत्र्यो
नविवेशतस्मै। नास्मिंनलक्ष्मीःकृणुतेनिवेशनमिरा॰॥४॥ नैनंरक्षोनपि

शाचो हिनस्ति न जंभको नाप्पसुरो न यक्षः। नास्तिका तस्य कुलेषु जायतंद
रा॰॥५॥ नैनं व्याघ्रो न वृको न द्वीपी न श्वापदं हिंसति किंचनैनं॥ न हस्ति नं ऋ
क्षमुपैति त्ती तम्रा॰॥१ नैनं सर्पो न पृदाकुर्हिनस्ति न वृश्चिको न तिरश्चीनराज्जः।
नैनं कृष्णो न सिंह तंद्रा॰॥२ नैनं प्रमत्तं वरुणो हिनस्ति न मकरो न ग्राहः शिं
शुमारः। पारावारां छिवमस्मै कृण्णोतीरा॰॥३ प्रमायुकं तस्य द्विषंतमाङ्कः
पुष्पमिव छिन्नं सहबंधनेन। उघइव शापाल्मणुदान्सपत्नानि रा॰॥४ अय
यं मणिः प्रतिसरो जांबो जीवाय बध्यते। अनेनेंद्रो वृत्रमहन्नभिषिणाचम
नीभिषिणा॥५॥ सहेंद्र द्विषतः सहस्वारातीः सहस्व पृतनायतः। नागइवह

४५

र्वपादास्याम न्नितिष्ठ पृतन्यतः॥२ आगादयं बैल्वो मणिः सपत्नक्षपणो वृषा
।तं पश्यंति कवयः सर्ववीरा यथा सपत्नान्समरे सहेयुः॥२ अमृतं मे मणेस्त्वम
श्विनावपिनह्यतां। बैल्वः सहस्रवीर्योसि मा ते त्वाशरिषं महं॥३ घृतादुल्लुप्तो मधु
मान्पयस्वान्धनंजयो धरुणो धारयिष्णुः। रुजंस्सपत्नानधरांश्च कृण्वन्त्वारोह
मां महते सौभगाय॥४ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। य
त्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां॥५ ग्रासद्रत्वा महाँ असी
ति पंच॥३५॥७॥ अथातो मणिकल्पो भूतिकामः पुष्येण त्रिरात्रोपोषितो जीव
तो हस्तिनो दंतान्मात्रा मुद्धृत्याग्नि मुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्य

दक्षिणंजान्वाच्योत्तरतोग्नेःकंसेमणिंकलाकृत्वाहोमान्मणौसंपातमानये
द्ब्रह्मवर्चसमित्येताभिःस्रुवमष्टाभिःसप्तरात्रंमधुसर्पिषोर्वासयित्वात्रिरा
त्रमेकांवाबध्नीयाद्घृताद्दुग्धेत्यस्येतयर्चातिरएवोत्तरंषड्भिर्हृदयशूलायाम
णिंप्रतोद्राय मणिंवामुसलाग्रमणिंवाखदिरसारमणिंवामांसौदनेवास
यित्वात्रिरात्रमेकांवाबध्नीयादेतएवोत्तरंचतसृभिर्विषमशृंगाग्रमणिंघृ ४६
तौदनेवासयित्वात्रिरात्रमेकांवाबध्नीयादेतएवोत्तरमेकयैरंडमणिंति
लौदनेवासयित्वात्रिरात्रमेकांवाबध्नीयादेतएवोत्तरंषोडशभिर्बिल्वंस
प्तरात्रंमधुसर्पिषोर्वासयित्वात्रिरात्रमेकांवाबध्नीयाद्घृताद्दुग्धैस्तुतिइत्येतय

---

६ ज्ञातुमिच्छेति ४ब्रह्मानुसंधानमेवयज्ञः ४सःऽपमृत्युसंसारंजयति

र्चातिरएवोत्तरंपंचत्रिंर्महावराहस्योदोदंष्ट्राक्षौदनेवासयित्वात्रिरात्रमेकां
वाबध्नीयाष्टक्रौसतिप्रथमंहस्तिच्छायायांवैयाघ्रेवापिचर्मण्यासीनोवापि
जुहुयादासीनोवापिजुहुयात् ॥ ८ ॥ ॥ आरण्यकेदशमोध्यायः ॥ १० ॥ अ
संन्यस्ते ४ थातोवैराग्यसंस्कृतेशरीरेब्रह्मयज्ञनिष्ठोन्ववेदंपपुनर्मृत्युंजयतितदु
साक्षात्कारे कर्तव्यत्वसादसा नि ५ हवाआत्माद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइतितमेतंवेदानुव आत्मानं ५
चनेनविविदिषंतिब्रह्मचर्येणतपसाश्रद्धयायज्ञेनानाशकेनचैतिमां हितमितमेध्या शनेन ३ श्रद्धेनविहितं
डूकेयस्तस्मादेवंविद्वांतोदांतउपरतस्तितिक्षुःश्रद्धावित्तोऽभूत्वात्मन्येवा
जीवः १ त्मानंपश्येदितिमांडव्योयोयंविज्ञानमयःपुरुषःप्राणेषुसएषनेतिनेत्यात्मा

सप्तमीभेदार्थेप्राणेभ्योभिन्नः १

१ब्रह्मैवब्राह्मणादित्यर्थः२बाह्याभ्यंतरव्यवहारशून्यं

अकार्यं३ खल्वेदंब्रह्मेदंक्षत्रमिमेदेवाइमेवेदाइमेलोकाइमानिसर्वाणिभूतानीदंस
३४ र्वंयदयमात्मासएषतत्वमसीत्यात्मावगम्योऽहंब्रह्मास्मीतितदेतद्ब्रह्मापूर्व अकारलं२
मपरमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वानुभूरित्यनुशासनमितिया
ज्ञवल्क्यस्तमेतंनापुत्रायनानंतेवासिनेब्रूयादितियद्द्मामद्भिःपरिगृही
तांवसुमतींधनस्यपूर्णांदद्यादिदमेवततोभूयइदमेवततोभूयइत्यनुशा
सनंतामेतामुपनिषदंवेदशिरोनयथाकथंचनवदेत्तदेतदाचार्यादितं। ४१
॥१॥ऋचांमूर्धानंयजुषामुत्तमांगंसाम्नांशिरोथर्वणोमुंडमुंडं।नाधीते
धीतेवेदमाहुस्तमज्ञंशिरश्छित्वासोकुरुतेकबंधं।स्थाणुरयंभारहारःकि

३वेदस्यशिरोभूतम्
४एतद्दानापेक्षयापिब्रह्मानुशासनंअधिकम्

लाभूदधीत्यवेदंनविजानातियोर्थं।योर्थज्ञइत्सकलंभद्रमश्नुतेनाकमेति
।इसा॰केएकादशोऽध्यायः॥३७
ज्ञानविधूतपाप्मेतिविधूतपाप्मेति॥१॥अथवंशः॥नमोब्रह्मणेनमआचा
र्येभ्योगुणाख्याच्छांखायनादस्माभिरधीतंगुणाख्यःशांखायनःकहोला
त्कौषीतकेःकहोलःकौषीतकिरुद्दालकादारुणेरुद्दालकआरुणिःप्रिय
व्रतात्सौमापेःप्रियव्रतःसौमापिःसोमपात्सोमपःसोमात्प्रातिवेश्यात्सो
मःप्रातिवेश्यःप्रतिवेश्यात्प्रतिवेश्योबृहद्दिवाद्बृहद्दिवःसुम्नयोःसुम्नयुरुद्दाल
कादुद्दालकोविश्वमनसोविश्वमनाव्यश्वाद्व्यश्वःसाकमश्वात्साकमश्वोदे
वरातादेवरातोविश्वामित्राद्विश्वामित्रइंद्रादिंद्रःप्रजापतेःप्रजापतिर्ब्रह्मणो

ब्रह्मास्वयंभूर्नमोब्रह्मणेनमोब्रह्मणे॥४॥ आरण्यके एकादशोध्यायःस
माप्तः॥ ॥श्रीरस्तु॥ संवत् १८५१ वरषे प्रथम ज्येष्ठ वदी १२ शनिवासरे॥
श्रीगाजुगतेश्वरजी श्री सुत गोपेश्वरजा श्रीवंशीलाल श्री आपोथि उपर नै श्रीगोछै॥

ॐ परोरजसेमंत्रस्येदितिविमलऋषिःतुर्यंछंदःपरमात्मादेवतामो
क्षार्थेजपेविनियोगःॐ परोरजसेसावदोम्॥ [illegible]

[illegible]

[illegible]

४९